No 62

॥ अथ बौधायनसूत्रानुसारी चातुर्मास्यप्रयोगः ॥

॥ पत्र ५४ ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

गाश्रीमन्मंगलमूर्तयेश्रीमत्सिंहाननविराजितमहसेनमः॥ ॥यस्यानंतंज्ञानंदानंध्येयंवि
धेयमभिधेयंच॥गीर्वाणेंद्रगुरोरिवदीनदयाब्धिंगुरुंनौमि॥१॥अथचातुर्मास्यप्रयोगः॥
चातुर्मास्यानीतिकर्मसमुदायनाम॥तेषांयावज्जीवसांवत्सरिकद्वादशाहयथाप्रयोगपक्षद्वा
त्रिंशत्प्रयोगाः॥तत्रयावज्जीवसांवत्सरिकाभ्यांवक्ष्यमाणाः फाल्गुन्याचैत्र्यांवापौर्णमा
स्यांवैश्वदेवहविर्भिरिष्ट्वातत्रश्चतुर्षुमासेषुवरुणप्रघासैस्ततश्चतुर्षुमासाकमेधहवि
र्भिस्ततश्चतुर्षुमासेषुशुनासीरीयहविर्भिर्यजेत॥द्वादशाहप्रयोगेतूदगयनआपूर्यमाणेप
क्षेदेवनक्षत्रेआरभ्यप्रथमेहनिवैश्वदेवहविर्भिरिष्ट्वाचतुर्थेहनिवरुणप्रघासैरष्टमनव
मयोःसाकमेधहविर्भिरंतिमेह्नि शुनासीरीयहविर्भिर्यजेत॥यथाप्रयोगइतिप्रयोगपर्या

प्तःकालः॥तस्याप्युदगयनआपूर्यमाणपक्षेदेवनक्षत्रेआरंभसमाप्तौ॥समाप्तिरप
रपक्षइतिकेचित्॥पर्वणिसमाप्तिरित्यन्ये॥इतिबोधायनोक्तपक्षासंभवेसांख्यायनोक्ते
काहिकप्रयोगोप्यनुष्ठेयः॥तत्रफाल्गुनीचैत्रीवैशाखीआषाढीश्रावणीभाद्रपदीकार्ति
कीमार्गशीर्षीपौर्णमासीप्रयोगकालः॥फाल्गुन्याचैत्र्यांवापौर्णमास्यांप्रतिपदिवाआषा
ढ्यादौतुप्रतिपद्येवेतिदेवयाज्ञिकाः॥वारुणप्रघासिकंतंत्रं॥अयमपियथाप्रयोगपक्ष
एव॥तत्राश्वलायनस्यबोधायनीयमतमवष्टभ्ययथाप्रयोगपक्षमवलंब्यचातुर्मास्यानि
चिकीर्षारूपयुक्तःप्रयोगउच्यते॥चातुर्मास्यान्यारभ्यमानोन्वारंभणीयापूर्वदिनेप्रात
र्विश्व देवंहुत्वापुण्याहवाचनपूर्वकंनांदीश्राद्धंरात्रावुदकशांतिप्रतिसरबंधोवि

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२

धायप्रातः स्नानादिपंचकांतेपश्चाद्गार्हपत्यस्येत्यादिनिविष्टमित्यंतेस्वर्गकामसिद्धि
द्वाराश्रीपरमेश्वरप्रीत्यर्थंचातुर्मास्येर्यक्ष्ये॥तन्मक्रध्यतामित्यादि।श्रोतथेत्यंते।ऋत्विग्वर
णमर्हणंचकृत्वापुनःपश्चाद्गार्हप त्यस्येत्यादिनिविष्टमित्यंते।चातुर्मास्यान्यारप्यमानो
वैश्वानरपार्जन्येष्ट्यायक्ष्ये॥तन्मक्रध्यतामित्यादि।श्रोतथेत्यंते।वैश्वानरपार्जन्येष्टिसं
बंधिहविः॥व्रीहिमयःपुरोडाशोद्रव्यं॥व्रीहिमयश्चरुः।पंचप्रयाजाः।अग्नीषोमावाज्यभागौ।
अग्निर्वैश्वानरःपर्जन्यइतिप्रधानदेवते।अग्निःस्विष्टकृदित्यादिसद्योयक्ष्यइत्यंते।इ
ध्मसंभरणांतंपौर्णमासवत्कृत्वाकर्मणेवामित्यादि।पात्रासादने।स्फ्यंचद्वादशकपाला
निचचरुस्थाल्यौचमेक्षणंचेतिविशेषः॥निर्वापे।देवस्यत्वा॰मुग्नयेवैश्वानरायजुष्टंनि

राम
२

र्वपामि।दे॰त्वांपुर्त्वायजुष्टं॰एवंप्रोक्षणे।मनसाचरुपुरोडाशीयान्विभज्याधिवपनंदेव
स्यत्वा॰मुग्नयेवैश्वानरायजुष्टमधिवपामि।द्वादशकपालान्युपधाय।आदेवयजनंहरतिनिहि
तांगारेचरुस्थाल्यांतिरःपवित्रमपश्चानीयध्रुवासिपृथिवीमितामधिश्रित्यनिर्ग्रुमि
त्यंगारैःप्रदक्षिणंपरिचिनुयात्॥जनयत्येत्यासंयौमीत्यंतेचतुर्थ्यंतनाम्नाचरुपुरोडाशीया
नभिमृश्यपुरोडाशप्रथनांतेआज्यंप्रकृतिवन्निरूप्यस्थाल्यांतिरःपवित्रंतंडुलानावप
ति।घर्मास्थविश्वायुषइति।पुरोडाशश्रपणांतेचरुमुद्दिश्याग्नेहव्यंरक्षस्वेति।ततःपुरो
डाशोसंब्रह्मणेत्यादिस्रुक्संमार्जनानामस्वाहाकारेणमंत्रेणोत्करेनिरासः।पुरोडाशो
द्वासनांतेआप्यायतामितिचरुमभिघारयेत्।अग्नयेवैश्वानरायजुष्टमभिघारया

३ मि। पर्जन्यायु जुष्टमभिघारयामीति विशेषः। चरुं शृतउत्स्रातं सुद्वास्य आर्द्रेणुवेन
स्यगोपाइत्यभिघारयेत्। चरोर्नोषंजनं। प्रधानमुपांशु। अग्नेर्वैश्वानरस्याहं देवयज्या
या शुचिः पूतो मेध्यो विपाप्मा ब्रह्मवर्चस्यन्नादो भूयासं। चरोर्मेक्षणेनावदाने। पर्जन्यस्या
हं देवयज्यया सुवर्गो भूयासं। स्विष्टकृतमवदाय मेक्षणं चादायास्याक्रम्य हुत्वा मेक्षणम
नुप्रहृत्य सꣳस्रावेणाभिजुहुयात्। अन्वाहार्यमासाद्य हिरण्यं धेनुं च दद्यात्। अग्नये हि
रण्यं रुद्राय गामिति प्रतिग्रहः। अग्नेर्वैश्वानरस्याहमुज्जिति॰ पर्जन्यस्याहमुज्जिति॰।
शेषं प्रकृतिवत्। पुनरालंभजपवर्जं संतिष्ठते ब्राह्मणतर्पणांते इष्टिः॥ ॥इति वैश्वानर
पार्जन्येष्टिप्रयोगः॥ अथ याः पुरस्तादित्यादि निविष्टमित्यंते वैश्वदेवहविर्भिर्य

राम
३

५ त्रयोदश्यां अष्टकाज्यहविरातंचनयोर्दधिसंपाद्य चतुर्दश्यामुदवसाय मथित्वा अरणीगतप्रायश्चित्तं हुत्वा
आगूर्य क्रिया वामरुद्भ्यो वरुणाय वरुणाय वैश्वानराय वैश्वानराय हुत्वा उदवसायसंकल्पयेदिति केशवः॥५

श्यो तन्मक्रध्यतामित्यादि। अंतर्थेस्यंते वैश्वदेवहविः। व्रीहिमयः पुरोडाशो द्व्यं।
व्रीहिमयश्चरुः। आमिक्षा च। नव प्रयाजाः। अग्नीषोमावाज्यभागौ। अग्निः सोमः सविता
सरस्वती पूषा मरुतः स्वतवसो विश्वेदेवा द्यावापृथिवी इति प्रधानदेवताः॥ अग्निः स्विष्ट
कृन्नवानुयाजाः। सूक्तवाकशंयुवाकौ इत्यादि। सद्योयश्च्या ह्यहकालस्तु श्वोयष्टा हेति।
अनघतनर्लुडभिधानान्न श्वोयश्च्य इति। विहारारंभपक्षे निष्क्रामः पशुबंधवत्। व्रतांते
ध्वर्युरिडाजपादि तूष्णीमसि दमादाय वेदकरयोरंतरेण प्राचीमुदीचीं वा दिशं गत्वा
थ यत्र वेस्यन्स्यात्तत्र गत्वा वटपर्णमसुषिरमशुष्काग्रं पलाशस्य शम्यां वा शाखां
छिनत्ति। इषे त्वा। अपउपस्पृश्य ऊर्जे त्वा इत्यनुमृज्यादीक्षे द्वा। हरति। इमां प्राचीमुदीचीं

४

मिषुमूर्जमुक्षिसंस्कृतां॥पृङ्क्षपर्णामश्वेक्षाग्रांहरामिपशुपामुहं॥ततःशारवयासह्ना
गत्यगोष्ठंगत्वाषड्वरान्वत्सानपाकरोति।वायवस्थेतिपुंसःएषायवस्थेतिस्त्रियः॥
ग्रहिसंसृष्टाःसंसृष्टेनैवमंत्रेणापाकुर्यात्।वायवस्थोपायवस्थेतिप्रतिवत्संमंत्रावृ
त्तिः।वत्सानांमाहःप्रेरयति।प्रेरणंपृथक्करणं।देवोवःसविताप्रार्पयतुश्रेष्ठतमायकर्म
णआप्यायध्वमघ्न्याइवभागमूर्जंसंतीःपयस्वतीःप्रजावतीरनमीवाअयक्ष्मा
मावःस्तेनईशतमाघशंसोरुद्रस्यहेतिःपरिवाजयन्निति।यजमानंस्मरति।ध्रुवा
अस्मिन्गोपतौस्यातबह्वीरितियथागतमेत्यजघनेनगार्हपत्यमग्निष्ठेनसुत्तरा
र्धेवाग्न्यगारस्योपगूहति।यजमानस्यपृष्ठ्यनूपाहि।ततोदेवस्यत्वेत्यभिदाहाना

राम
४

दिदुग्धसंस्करणांतं।तत्रप्रसूमयःप्रस्तरःमुष्टित्रयंयुतएकोमुष्टिरितिमुष्टित्रयंबर्हिः।
शिवली कौर्मर्यमयाःपरिधयः।ततस्त्वांत्रयोविंशतिर्धेतिविशेषः॥ततःशारवायाःपर्णानि
छित्वाःग्रेणगार्हपत्यंनिधायमूलंछित्वोपवेषंकृत्वागार्हपत्यस्यपश्चान्निदध्यात्।
शारवायामूलेदर्भमूलानिबध्वाद्विगुणंरज्जुंप्रादेशमात्रींसंप्रसार्याग्रेयथ्रीपात्।
त्रिवृत्पलाशोदर्भइयोन्प्रादेशसंमितः॥पूजेपवित्रंपोतृतमंपयोहव्यंदेवानुमे॥अथ
पयसासायमग्निहोत्रंहुत्वाहुतशेषंरक्षेत्।होमातेगार्हपत्यस्योत्तरतस्तूष्णीषुदो
हनपात्रंशारवापवित्रंस्थोस्थाविति द्वंद्वंन्यचिसादयित्वोत्तानीकृत्यकमंडलुजलेन
सकृन्मंत्रेणद्विस्तूष्णींप्रोक्षेत्।शुंधध्वंदैव्यायकर्मणेदेवयज्यायै।ततोजघनेनगा

र्हपत्यमुपविश्योपवेषेणायतनांतरे चोरी चोंगारानपोहति। मातुरिश्वनोघ्रर्मोसि। तेषु
च्छालीमधिश्रयति। घोरासि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृंहस्व मा
क्षोः। तस्यां प्राग्ग्रं शारवापवित्रं निदधाति। वसूनां पवित्रमसि शतधारं वसूनां पवित्रमसि
सहस्रधारं। तदन्वारभ्य वाचं यमश्नायती गोः प्रतीक्षते। एता आचरंति मधुमद्दुहानाः
प्रजावतीर्यशसो विश्वरूपाः। बृहद्भर्वंतीरुपजायमाना नाडुहवो विश्वे देवा मयंतु गावः॥
परिक्रमिणमाह। उपसृष्टां मे प्रब्रूतात्। सवत्सं विमुच्य प्रत्याह। उपसृष्टां दुह्यमानामनु
मंत्रयते। हुतस्तोको हुतो द्रप्सोग्नये त्वा हुते नाकाय त्वा हाघावौ पृथिवीभ्यां। परिक्रमीग्नि
तरेण वेधस्कोत्र पद्यस्थाल्यां पयश्चानयति। अध्वर्युस्थाल्यां पुर स्तात्प्रत्यङ्मुखं

सिंचंतं परिक्रमिणं पृच्छति। कामं धुक्षत्रणो बृहद्विश्वेभ्यो देवेभ्यो हविरिंद्रियं सश्राहत
गंगां। यस्यां देवा नामनुष्याणां पयो हितं॥ अध्वर्युस्तामनुमंत्रयते। सा विश्वायुः। एवमुत्तरा
पोः। तत्र यमुनां। सा विश्वव्यचाः। सरस्वती। सा विश्वकर्मेति त्रिशो घः। अध्वर्युस्त्रिस्रुषु दुग्धा
सु वाचं विसृजते। बृहद्दुग्धि विश्वेभ्यो देवेभ्यो देवेभ्यो हव्यमाप्यायतां पुनः॥ वृत्रेभ्यो मनु
ष्येभ्यः पुनर्दोहार्यकल्पतां॥ पुनः प्रयोगे चिरीर्षायाअभावे नेषमंत्रः। अनन्वारभ्योत्तरास्तू
ष्णीं दोहयित्वा दोहनपात्रेपः आनीय संक्षालनं कुंभ्यामानयति। संपृच्यध्वमृतावरीरूर्मि
णीर्मधुमत्तमामुद्राधनस्य सातये। नक्षोदगुद्दास्य शीतीकृत्योदगग्रं पवित्रं निधाय स्क
न्देनाय वदलं दध्नातनक्ति। सोमेनुत्वातनक्मि विश्वेभ्यो देवेभ्यो दधि। अग्निहोत्रोछेषण

मस्यातनक्ति॥ युजस्य संतनिरसि युजस्य त्वा संतनिमनु संतनोमीति॥ कुंभ्यामु
पसरि पवित्रं निधायोदक पूर्णेन कंसेनाच्छादयति॥ अदेलमसि विष्णवे
त्वा युज्ञायेति यादधाम्यहं॥ अद्भिरद्भिरिति पात्रेण याः पूताः परिशेरतइति॥
शिक्यादौ निदधाति॥ विष्णोर्हव्यं रक्षस्वेति॥ ततो गोष्ठं गत्वा प्रात
र्दोहाय तृष्णीं दर्भैर्वत्सानपाकरोति॥ सिद्धदुग्धमात्रग्रहणे तु वत्सा
पाकरणप्रभृतीनासेचनप्रभृतीन्वा मंत्रानेव ब्रूयात्॥ इदं च सर्वं
सोमयागोक्तरानुष्ठानेन कसोमे ज्यायेअमंत्रकोणिपयासीति च

मानेन॥ अस्मिन्केशाखाहरणादिसर्वममंत्रकं॥ सद्यस्कालपक्षे तु त्रिर
त्करणात्॥ न सायंदोहः॥ प्रातर्दोहाय पात्रासादनमात्रं॥ तत्रैकैव स्थाली॥
प्रातर्दोहाय तूष्णीं दर्भैर्वत्सापाकरणमिति विशेषः॥ ततो द्वयहः का
लेप्रातर्हुतेग्निहोत्रे सद्यस्कालेत्वेतदानीमेव हस्तावनेजनात्परास्त
रणाद्वापूर्वं गार्हपत्ये स्मार्तं वा दाज्यं संस्कृत्य जुहूं चतुर्गृहीतं गृहीत्वा
हवनीये समिधमाधाय पर्युक्षणं परिस्तीर्य यजमानान्नारभ्य पंचहो
तारं मनसानुद्रुत्य जुहोति॥ अग्निर्होता॥ अग्निर्नो ध्रुवः॥ त्वष्टाग्नीत्र॥

मित्रउपवक्ता।।सोमः सोमस्यपुरोगाः।।शुक्रः शुक्रस्यपुरोगाः।।श्रातास्त
ऽइंसोमाः।।वातापेहिवनस्पतेः स्वाहेति।। य॰।। नाचस्पतये ब्रह्मणऽइदं।।
एष्यास्तरणात्पूर्वंहोमेनपरिस्तृतिः।।ततस्तेनैवान्येन कूर्मांऽहवोपस्था
नवरदानं तेध्वर्युः सारस्वतौ जुहोतिनवा।।होमपक्षे चतुर्ग्रहीतंग्रही
त्वा।।पूर्णापश्चादुतपूर्णा पुरस्तादुन्मध्यतः पौर्णमासीजिगाय।।तस्यां
देवा अधिसंवसंतउत्तमेनाकंरुहमादयंतां।।अग्नीषोमौप्रथमौपौ
र्णमासंवसूनरुद्रानादित्यानिहजिघ्नते।।माध्यऽहिपौर्णमासजुषे

यांब्रह्मणाबृद्धोसुकृतेनसातावथास्मभ्यंऽसहवीराऽरयिंनियच्छतुऽस्वाहा।।पौर्णमा
सायेदं।।।पुनस्तथैवगृहीत्वा।।निवेशनीसंगमनीवसूनांविश्वारूपाणिवसूनयावेशयंती।।
सहस्रपोषंऽसुभगारराणासानऽआगूंचर्चसासंविदाना।।यत्रैदेवाअदधुर्भागधेयम
मावास्येसंवसंतोमहित्वा।।सानोयज्ञंपिपृहिविश्ववारेरयिंनोधेहिसुभगेसुवीरंऽस्वा
हा।।फा॰।।अमावास्यायाइदं।।।पंचहोत्राघेतदंतंप्रथमप्रयोगएव।।विकृतोप्राकृतान्वा
पंचमणीयायाअनुष्ठानवत्पंचहोत्रसारस्वतहोमयोरप्यनुष्ठानमितिसांप्रदायिकाः।।
अथहस्तावनेजनादिस्थंचकपालानिच२८चरुस्थालीश्च४मेक्षणानिच४जुहूंचकृ
संबोपभृतंचाएषदाज्यग्रहणीचाआज्यस्थालीश्च३।।दारुपात्रीचांशुपात्रंचामिक्षा

युद्धरणपात्रीच धृष्टिंचोपवेषंचेतिसवि शेषाणि पात्राण्यासादयेत्॥ततोनिर्वपे
देवस्यत्वा॰ सूर्यस्येजुष्टंनिर्वपामिसोमायजुष्टं॰ सवित्रे॰सरस्वत्यै॰पूष्णे॰मरुद्भ्यः स्वतव
द्भ्यो॰ द्यावापृथिवीभ्यांजुष्टं॰ इतिविशेषः॥निरुप्तानुमंत्रणेसरस्वत्यादिषु॰अग्निर्होता
रमिहतंहुवेदेवीर्यत्रियोर्हव्याहवामहे॥आयंतुदेव्यःसुमनस्यमानाविर्यंतुदेव्योहविषो
मेअस्य॥निरुप्तामिमर्शनेइदंदेवानां॥छत्रिन्यायात्॥एवंप्रोक्षणेदेवस्यत्वा॰सू
र्यस्येजुष्टंप्रोक्षामिसोमायजु॰सवित्रेजु॰सरस्वत्यैजु॰पूष्णेजु॰मरुद्भ्यःस्वतवद्भ्यो
जु॰द्यावापृथिवीभ्यांजुष्टंप्रोक्षामि॥करस्तांपुनक्तिसतांपुनक्तिसंतेप्रातर्दोहःसायं
दोहवत्॥मातरिश्वनइत्याद्युदगग्रेणपवित्रेणआर्तवनपिधानवर्जं॥नवत्सापाकरणं॥

चरुपुरोडाशीयान्विभज्यादेवस्यत्वा॰अग्नयेजुष्टमधिवपामिसवित्रेजुष्टमधिवपामिपूष्णे॰
मरुद्भ्यःस्वतवद्भ्योजुष्ट॰द्यावापृथिवीभ्यांजुष्टमधिवपामीत्यधिवपनं॥धृष्टिरसीत्युपवेषमा
दायतेनाग्नयेष्टोकपालान्युपधायपूर्ववत्सोमायचरुस्थालीमधिश्रित्यमुख्यधृष्ट्येवांगारेः
परिचिनुयात्॥तथैवसवित्रेद्वादशकपालान्युपधायसरस्वत्यैपूष्णेचरुस्थाल्योमरुद्भ्यःस्वत
वद्भ्यःसप्तकपालानि॥ततस्तूष्णीमंगारंतत्रतूष्णीस्थालीतस्यांतिरःशारवापवित्रंनिधायप्रातर्दो
हमानीयमेक्षणेनालोड्यश्रपयति॥ततोमंत्रेणांगारंतस्मिन्ध्रुवमसीत्येककपालंतत्रनि
दधाति॥भृगूणां॰तप्यस्व॥यद्धर्मकपालमुपचिन्वंतिबुधसः॥पूष्णस्तदपि
व्रतइंद्रवायूयुंक्तां॥अध्वर्युः॥पोडशपिष्टानिविभज्य॥संवपने॥ देवस्यत्वा॰अग्नयेजुष्टं॰संवपामि

सवित्रेजुष्टꣳसुवैषामिमरुद्भ्यःस्वतवद्भ्योजुष्टꣳसंवैषामिद्यावापृथिवीभ्योजुष्टꣳसंवैषामि॥यथा
देवतमभिमर्शः॥आग्नेयमधिश्रित्यमंत्रवदाज्यंतूष्णींदधिचापूर्वाज्यंनिरुप्यसोम्यसारस्वत
स्छाल्योस्तंदुलान्घर्मास्छेविश्वायुषः॥पोषस्छाल्यांघर्मालिस्छविश्वायूꣳषीतिपिष्टानि
समानयति॥पयसिशारवापवित्रंनिधायद्व्यहःपक्षेसायंदोहंदध्यानयति॥सद्यःपक्षेलोकि
कं॰॥सामिक्षा॥तांकश्चित्कुशलःअपयित्वाविभक्तवाजिनांवृत्वाशीतलदेशेनिदधाति॥
ततएकंकपालमधिश्रयति॥त्वचंगृह्णीयेत्यादि॥चरुपुअग्नेहव्यꣳरक्षस्व॥प्रोक्षणीरासा
दयेध्मावर्हिरुपसादयस्रुवंस्रुचश्च कꣳसंचसंमृडिपत्नीꣳसंनह्याज्येनचदध्नाचोदेहि॥
अग्नीदक्षिणेनस्रुवजुहूकंसोपभृत्स्रपदाज्यग्रहणीःसव्येनध्रुवांप्राशित्रहरणंवेदपरि

वासनंचारायॐजुहूंसंमृज्य॰वाचंप्राणंमानिर्मृक्षंवाजिनंत्वासपत्नसाहꣳसंमार्ज्मीतिकंसं
संमार्ष्टि॥उपभृतंसंमृज्यतद्वत्स्रपदाज्यग्रहणीसंमार्ष्टि॥संमार्जनमुत्करेनिरस्यति॥आ
ज्यग्रहणेउपभृतिप्रभृतिवच्चतुर्गृहीत्वाएषपदाज्यग्रहण्योर्द्विरुपस्तृणाति॥मुहीनांपयो
सीतिप्रथमं॥यजमानोनुमंत्रयते॥सुवीर्यायत्वागृह्णामि॥विश्वेषांदेवानांतनूरितिद्वितीयं॥
यज॰सुप्रजास्त्वायत्वागृह्णामि॥तत्रबर्हिषीअंतर्धायाधिश्रितंदध्यानयति॥ऋध्यासं
मृधःपर्वतानांग्रहंपर्वतानांग्रहोसि॥बर्हिषीउधृत्यतदभिघारयति॥विष्णोर्हृदयमसि॥य॰
गयस्योर्णाय॰॥पुनरभिघारयति॥एकमिषुविष्णुस्त्वानुविचक्रमेपृथिवीदृंहाचृतेनयध
तां॥य॰ब्रह्मवर्चसायत्वा॰॥बर्हिरास्तरणेमुष्टित्रयमप्येकीकृत्यप्रथमेमुष्टिमास्तृणाति॥

एवं द्वितीयतृतीयौ॥ प्रस्तरमासाद्यतस्मिन्वित्रस्यावित्र स्यवाशस्यापवित्रमासादयति॥ स्रुक्सादने॰ उपभृतमनुष्टुपदाज्यग्रहण्यास्तन्मंत्रेणासादनं॥ सर्वत्रष्टुपदाज्यग्रहण्यामुपभृद्धर्मापवंति॥ हविरुद्वासने॥ दारुपात्र्यांस्योनंतुदृतिस्त्रिरुपस्तीर्यांशयपात्रेचसंवृन्मंत्रेणापस्तीर्यसप्तकपालांतंयथादेवतमुद्वास्यशुद्धरणपात्र्यांतूष्णीमुपस्तीर्यआमिक्षांपुनःस्वस्थानेधिश्रित्यतूष्णीमभिघार्योद्वास्यशुद्धरणपात्र्यामुद्धृत्यतदुपरिकिंचिद्वाजिनंस्रुवेणानीयपुनरभिघार्यालंकरोति॥ यस्तआत्मापशुषुप्रविष्टोदेवानांविश्रामनुयोवितस्थे॥ आत्मन्वान्सोमघृतवान्हिपूतादेवानांछ्रुसुर्विदयजमानायुमह्यं॥ ततएककपालमुद्वास्याशयपात्रेनिधायापूर्वाज्येनाविःपृष्ठंकरोति॥ कपालोद्वासने॥

यद्धर्मेकपालेमित्येककपालेपूर्ववत्॥ वाजिनमुलूखलेवाविश्रेयैवाःसाद्यांतर्वेदिस्रुवेणासंहवीष्यासादयति॥ भूर्भुवःसुवरितियजमानोनुमंत्रयते॥ यन्मेअग्रइति॥ अथाध्वर्युरुलूखलेतूष्णीमुद्धाजिनमास्तीर्याधिमंथनशकलंतत्रप्रागायतंनिदधाति॥ अग्नेर्जिह्वेत्रमसि॥ तस्यार्धयोःसहैवप्रागायतेअन्येशकलेनिदधाति॥ वृषणौस्थः॥ अथदक्षिणोत्तराभ्यांहस्ताभ्यांउत्तराधरारणीआदत्ते॥ पूर्वेर्यस्यपुरेसिपुरूरवाः॥ तेअपूर्वाज्यस्थाल्यासमनक्ति॥ घृतनाक्तेवृषणंदधाथां॥ अधिमंथनशकलेअरणीनिधायायजमानंवा चयति॥ गायत्रंछंदोनुप्रजायस्वत्रैष्टुभंछंदोनुप्रजायस्वजागतंछंदोनुप्रजायस्व॥ होतारमाह॥ अग्नयेमथ्यमानायानुब्रूहीति॥ मथित्वाजातआह॥ जातायानुब्रूहीति॥ प्रदीयमाणायानुब्रूहीत्युक्त्वायजमानाचारध्वोजातमग्निमाहवनीयेरुपेवजुहोति॥ भवतंनःसमनसौसमनसावा

LIBRARY OF THE ROYAL ASIATIC SOCIETY BOMBAY BRANCH

रेपसौ॥मायुज्ञ॰हिं॰सिष्टुमायुज्ञपतिंजातवेदसोऽग्नेर्भवतमुद्यनः॥ततःस्रुवेणापूर्वाज्यं
जुहोति॥अग्नावग्निश्चरति प्रविष्टऋषीणांपुत्रोऽधिराजएषः॥स्वाहाकृतंब्रह्मणातेजु
होमिमादेवानांमिथुयाकर्मागुधेयुः॰स्वाहा॥प्रविष्टायाग्नयइदं॰॥होतरेऽहीत्यादिचतुरः
प्रयाजानिष्ट्वापंचमादीनूमध्येजुहोति॥चतुर्थाष्टमयोःसमानयमानोऽष्टमेसर्वंसमानय
ति॥य॰॥चतुरःप्रभृतिवदनुमंत्र्य पंचमेनेतराननुमंत्रयते॥प्रयाजशेषेणाध्रुवाप्रभृति
पुनर्ध्रुवामभिघारणवर्जंयथाक्रमंहवींष्यभिघार्यउपभृत्स्थानेपृषदाज्यमभिघारयेत्॥
अथप्रधानं॥तत्रसवितारकपालश्चोपांशु॥अग्नेरहं॰अन्नादोभूयासं॥सोमस्या
हं॰प्रजयोचपशुभिश्चजनिषीय॥सवितुरहं॰स्वस्तिमान्पशुमान्भूयासं॥सरस्वत्या

अहं॰वाचमन्नाद्यंपुषेयं॥पूष्णोहं॰पुष्टिमान्पशुमान्भूयासं॥मरुतां॰स्वतवसामहं॰प्राणै
र्ऋध्यासं॥आमिक्षामुपस्थानाभिमर्शनवर्जं स्रुवेणाद्विरवरायतूष्णीं प्रत्यभिघारयेत्।
विश्वेषांदेवानामहं॰प्राणैःसायुज्यंगमेयं॥जुह्वामुपस्तीर्यएककपालमुपस्थानाभिमर्श
नवर्जंसर्वमवदायाशयोद्वितीयमवदायध्रौवात्यादभिघार्याशयेप्रत्यभिघार्यापर्यावर्तय
प्रतिष्ठितंजुहुयात्॥द्यावापृथिव्योरहं॰उक्षयोर्लोकयोर्ऋध्यासं॥अध्वर्युःसंस्रावेणाभिजु
हुयात्।मधुश्चेतिचतस्रोवाआहुतीराज्यस्थाल्याज्या त्स्रुवेणजुहुयात्।मधुश्चस्वाहा॥
मधवइदं॰॥माधवश्चस्वाहा॥माधवायेदं॰॥शुक्रश्चस्वाहा॥शुक्रायेदं॰॥शुचिश्चस्वाहा॥
शुचयइदमितिविष्टकृदंतेमेक्षणान्यनुप्रहृत्यसंस्रावेणाभिजुहुयात्॥अन्वाहार्यमासा

घद्वादशगाः प्रथमजंवत्संचदद्राति॥ब्रह्मणाश्रोरनंतेनो॰रुद्रायुगाः ताभिः॰रुद्रायुगांतेनो॰इ
तिप्रतिग्रहः॥हविःशेषानुद्वास्यवाजिनंगा र्हपत्येधिश्रित्याभिघार्योद्वास्यपुनरभिघार्ययस्ते
श्रात्मा॰मह्यमित्यलंकृत्य भूर्भुवःसुवरित्यंतर्वेद्यासादयेत्॥यज॰यन्मेअग्रे॰उपस्थेइत्यनु
मंत्रयते॥अध्वर्युः॥ब्रह्मन्प्रस्थास्यामइतिषडाज्यंजुह्वामानीयतेन नवानूयाजान्यज
ति॥यजयजेतीतरान्॥सप्तमांसोसंभिद्ययजेत्॥यज॰बर्हिषोहं॰प्रजावान्॰१॥द्वारामुहं॰प्र
जावान्॰२उषासानक्तयोरहं॰प्रजावान्३जोष्ट्र्योरहं॰पशुमान्॰४उर्जाहुत्योरहं॰पशुमान्५
देव्योर्होत्रोरहं॰पशुमान्॰६तिसृणांतिसृणां देवीनामहं॰आयुष्मान्युक्तेन प्र॰७नराशंसस्या
हं॰पशुमान्॰८अग्नेःस्विष्टकृतोहं॰युष्मान्॰९॥देवायबर्हिषइदं॰देवीभ्योद्वार्भ्यइदं॰देवीभ्यामु

षासानक्ताभ्यामिदं॰देवीभ्यांजोष्ट्रीभ्यामिदं॰देवीभ्यामूर्जाहुतिभ्यामिदं॰देवाभ्यांदेवाभ्यांहोत्र
भ्यामिदं॰देवीभ्यस्तिसृभ्यस्तिसृभ्यो देवीभ्यइदं॰देवायनराशंसायेदं॰देवायाग्नयेस्विष्टकृतइदं॰
॥१॥अनुमंत्रणेआद्यंदेवपदंकेचिन्नेछंति॥अथासपत्नानितिसकृदुच्चारितेनमंत्रेणोपस्तृ
षडाज्यग्रहस्याहः सहेव॥विपंतुवर्यइत्यस्यावृत्तिः॥यथादेवतमुज्जितिवाचनं॥शाखापवि
त्रेणसहप्रस्तर प्रहरणं॥उपस्तृषडाज्यग्रह णीभ्यांसहसंस्त्रावहोमः॥स्रुग्विमोके॥अ
ग्नेर्वोपन्नगृहस्य॰सुम्निन्यःसुम्नेमाधत्तधुरिधुर्यौपात॥कंसमंतर्वेदिनिधाय बर्हिषिसर्वतःपा
तयन्कंसेवाजिनमानयन्नाह॥मध्यमस्वरेण॥वाजिभ्यानुब्रूहि॥उपस्तरणाभिघारणेनस्तः॥
वाजिनोयज्ञ॥प्रथमवषट्कारेवाजिभ्यःस्वाहेतिहुत्वाद्वितीयेतूष्णीजुहुयात्॥य॰प्रथमेवाजिभ्यइदं॥
वाजिनामहंदेवयज्ययारेतस्वीभूयासं॥द्वितीयेग्रयइदं॰अग्नेरहंदेवयज्ययायुष्मान्॰गमेयं

अध्वर्युः॥उदङ्ङेत्य समशेषं कं संहोतुर्हस्ते दद्यात्॥सर्वैश्चारयेरन्॥होतुरुपह्वयां तेऽध्वर्युः होतरुपह्वयस्व ब्रह्मन्नुपह्वयस्व॥अग्नीदुपह्वयस्व॥यजमानोपह्वयस्व॥इत्युपह्वयं कुर्यात्॥उपहूतइति प्रतिवचनं॥एवमन्ये॥वेद्यां निधायोपह्वक्रमेणाकिंचिल्लिंचिरादायसर्वसौत्रेण॥यन्मेरेतः प्रसिक्तं यत्तेपद्वामेअर्पिगच्छति यद्वजायतेपुनः॥ तेनमा त्रिवमा विंश तेनमा वाजिनं कुरु तस्यैतवाजिपीतस्योपहूतस्योपहूतोभक्षयामीत्यनेनोपक्रमेणान्यं भक्षयंति॥प्रसक्षंयज्ञा॥त्रिर्लिंज्यपात्रं निदध्यात्॥समिष्टयजुः कालेतवेदिदक्षिणेनपदा तिष्ठन्अध्वर्युर्ध्रौवाज्यास्रुवेणजुहोति॥यज्ञोयज्ञंगच्छयज्ञपतिंगच्छस्वां योनिंगच्छस्वाहा॥यन्यज्ञायेदं॥पुनः॥एषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीरःस्वाहा॥यज्ञपतयइदंदेवा गातुविदस्यादिप्रकृतिवत्॥यज्ञविमोकांतेयजमानउत्करेउपवेषस्यस्कृत्प्रदेशमुपगृह्णाति॥यंदेवामनुष्येषूपवेषम

राम १३

धारयन्॥येअस्मदपचेतसस्तानुस्मर्यमिहाकुरु॥उपवेषोपविष्टिनः प्रजांपुष्टिमथोधनं॥द्विपदो नश्चतुष्पदोध्रुवानंपगाकुरु॥ब्राह्मणतर्पणांतेयजमानः प्राङ्मुखः स्वस्थानस्थः संकल्पयेत्॥केशान्निवर्तयिष्ये॥श्मश्रूणिवापयिष्ये॥अधःशयिष्ये॥मधुमांसलवणस्त्र्यवलेखनानिवर्जयिष्ये॥नदंतान्धावयिष्ये॥नवासःप्रक्षालयिष्ये॥नानृतंवदिष्ये॥नपादौप्रक्षालयिष्ये॥नान्यस्यार्त्विज्यंकरिष्ये॥नांजयिष्ये॥नाभ्यंजयिष्ये॥नमृन्मयेनपास्यामि॥वासःप्रक्षालनमूषादिना॥सांवत्सरिकारिष्टजातपुत्रऋतौभार्यामुपेयात्॥अथतदवस्थस्ययजमानस्यपुरःप्रत्यङ्मुखःआसीनोध्वर्युः प्रागादिक्रमेणमध्ये चेतिपंचधात्रेण्याश्चालल्याशिरोविभजति॥ऋतमेवपरमेष्ठि॥ऋतंनास्तेतिकिंचन॥ ऋतेसमुद्रआहितः॥ऋतेभूमिरियंश्रिता॥अग्निस्तिग्मेन शोचिषा॥तपआक्रांतमुल्लिहा॥शिरस्तपस्याहितं॥वैश्वानरस्यतेजसा॥ऋतेनास्यनिवर्तये॥सप्तेनपरि

वर्तये॥ तपसास्यानुवर्तये॥ शिवेनास्योपवर्तये॥ शमेनास्याभिवर्तये॥ शीर्षस्तदृतं तत्सत्यं॥ तद्ध्रुतं तच्छ्रद्धेयं॥ तेनैशकेयं तेनैराध्यासं॥ प्रतिविभागं मंत्रावृत्तिः॥ मंत्रावृत्त्यैव विभागक्रमेणावपनं॥ तच्चभ्म श्रुपूर्वं॥ ततः स्नातो यजमानः स्वस्थानस्थः संवत्सरीणां स्वस्तिमाशास्ते इति वदेत्॥ ॥ इति वैश्वदेवपर्व॥ ॥ अथ वरुणप्रघासाः॥ ॥ तत्र विहारः॥ प्राकृताहवनीयस्य पुरो मध्यशंकोः द्विपदेन्यंशंकुं निहत्य तत्पुरोदेशे द्वादशपदेन्यंशंकुं निहन्यात्॥ अष्टादशपदमितां रज्जुमुभयतः पाशांकृत्वा त्रयोदशपदांते च चतुर्दशपदांते च चिह्नं कृत्वा शंकोः पाशौ प्रतिमुच्य त्रयोदशपदचिह्नं दक्षिणतउत्तरतश्चाकृष्य चतुर्दशपदांते शंकुं निहन्यात्तावंसौ॥ रज्जुं विपर्यस्य दक्षिणतउत्तरतश्चाकृष्य त्रयोदशपदांते शंकुं निहन्यात्तेश्रोणी॥ एवं दशपदा पश्चात्तिरश्ची॥ अष्टपदा पुरस्तात्तिरश्ची॥ द्वादशपदा प्राचीपार्श्वाधिकी वेदिर्भवति॥ वेदिपूर्वतादारभ्य पश्चादर्ध

दे

परमवशिष्य षड्विंशदंगुलप्रमाणं समचतुरस्रं प्रादेशोर्ध्वप्रमाणं जानुमात्रांशम्यामात्रां वोत्तरवेदिमाहवनीयवत्साधयेत्॥ तस्यामध्ये प्रादेशमात्रांचतुरंगुलोन्नतां समचतुरस्रां जानुमात्रोच्छ्रायेणोपरमात्रामुत्तरनाभिं कुर्यात्॥ पाशुकवेदेर्दक्षिणतो दार्शिकीवेदिस्तथा कार्या यथा तदीयाबुत्तरश्रोण्यंसौ पाशुकवेदेर्दक्षितस्त्रयोदशांगुलास्परो भवतः॥ उभे वेदी पश्चिमपार्श्वे समे॥ पाशुकवेद्युत्तरांसमारभ्य चत्वारि पदानि प्रत्यक्प्रक्रम्य तदुत्तरतएकं पदमतीत्योत्तरो विहारद्वयसाधारणः कार्यः॥ उत्तरांसमारभ्यैव पदद्वयं त्रयं वा प्रक्रम्योत्तरतोपि पदे पदानि पातीत्यशम्यामात्रः समचतुरस्रश्चात्वालः॥ दक्षिणवेदिपूर्वार्धं आहवनीयायतनमिति॥ ॥ अथ पात्राणि॥ ॥ स्फ्यश्चाग्निहोत्रहवणी जुहूश्चेति चतुष्टयं॥ मेक्षणं चमसो दारुपात्री च परिवासतं॥

वेदस्यवेदकोध्वष्टिःस्थाल्यो सर्पिःप्रधानयोः॥इतिप्रतिप्रस्थातुः॥तानिचसौवर्णानिराजता
निशमीमयानिवा॥वैश्वदेवबदध्वर्योः प्रसूमयोप्रस्तरौ॥वैश्वदेववदेकमिध्मावर्हिः॥
परंपशुवत्॥द्विशताद्वर्धंशमीपर्णानि॥करीरसक्तूनौशमेषीकंवाशूर्पं॥गार्हपत्येद
षद्वृष्टानांयवानांश्चक्ष्णापिष्टानि॥तत्रतप्ताभिरद्भिर्घृतेनदध्नावासंयुज्ययजमानतस्यु
त्रपोत्रपार्याःप्रन्तदुहिस्टसमसंख्याकान्येकातिरिक्तानिकारालिकरंभपात्राणि॥तिषा दीपा
मेवपिष्टानांसश्रृंगंमेषमश्रृंगांमेषीचतोश्रुक्लाणांप्रछन्नोपवतुषानूदेवहारूपरिधीन्
गुगुलुंसुगंधितृणंमेषश्रृंगमध्योत्पनामूर्णांचसंपादयेत्॥ततोयजमानःविहरणपक्षे
अरणीगार्हपत्येप्रतितपति॥अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः॥तंजानन्नग्नआ १५

सीदाथानोवर्धयाग्निं॥अजस्रपक्षेतूष्णीमितरयोरपि॥अथपत्न्यचारध्वोरणीसंभारांश्चारा
योदक्षंपुरस्तुत्यशालांपरीत्यपूर्वयाद्वारा प्रपद्य॥प्रसवरोहजातवेदः पुनस्त्वंदेवेभ्यो
हव्यंवहनःप्रजानन्॥प्रजांपुष्टिंरयिमस्मासुधेह्यथोपत्नीयजमानायपुत्रांयोरितिमंथेत्॥
अथाध्वर्युःशोल्बमानंकृत्वोदुत्वावोक्ष्योदुरणपक्षेआहवनीयंप्रणीयाजस्रपक्षेऽग्नी
न्विहृत्यस्मार्तवदाज्यंसंस्कृत्य चतुर्गृहीतमाहवनीयेजुहोति॥मनोज्योतिर्जुषतामाज्यं
विच्छिन्नंयज्ञंसमिमंदधातु॥यादृष्टायुषसोनिम्रुचश्चतःसंदधामिहविषाघृते
नस्वाहा॥यज०मनसेज्योतिषइदं॥विहरणपक्षेतमाहवनीयंपरिस्त्यज्य॥याःपुरस्ता
दित्यादिवरुणप्रघासहविर्पिर्यक्ष्ये॥तन्मऋध्यतां०ओंतथेत्यंते॥वरुणप्रघाससं

बंधिहविः॥व्रीहिमयः पुरोडाशोद्रव्यं॥व्रीहिमयश्चरुः॥आमिक्षा च॥नव प्रयाजाः॥अग्नीषोमावा
ज्यभागौ॥अग्न्यादिपूषांतेइंद्राग्नीमरुतोवरुणः कः इति प्रधानदेवताः॥अग्निः स्विष्टकृत्॥न
वानुयाजाः॥सूक्तवाकशंयुवाकौ सप्तपत्नीसंयाजाः॥एवमात्मकेन सांगेन कर्मणा सद्योयश्य
इत्यंते प्रभृति वह्निहुत्यान्वाधायव्रतांतेऽध्वर्युप्रतिप्रस्थातारौ इडाजपादिशारवाछेदनां तं
वैश्वदेववत्प्रवृत्तिक्रमेण कुर्यातां॥अध्वर्युः पंचविधं बर्हिः॥स्थाता त्रिविधं बर्हिः॥अत्र मुष्टि
त्रयमिति यज्ञतंत्रदेवकेशवाः॥त्रयोविंशतिधेत्यूहः॥उभयोः संभरणं च॥स्थाता मारुत्ये
सायं दुह्यात्॥ततोध्वर्युर्वारुण्ये॥तत्र दुहे मरुतो रमयंतु गावः॥मरुद्भ्यो हविरिदियं॥मरु
द्भ्यो देवेभ्यो॰ कल्पतां॥मरुद्भ्यो दधि॥इति स्थातुः॥वरुणो रमयतु गावः॥वरुणाय हविरि

दियं॥वरुणाय देवेभ्यो हव्यं॰॥वरुणाय दधीत्यध्वर्योर्विशेषः॥शेषं वैश्वदेववत्॥कर्मणेवामि
ति पाणिसंमर्शनमुभौ कुरुतः॥अध्वर्युरेवाग्नीन्परिस्तीर्यासनानि कल्पयति॥दक्षिणवेदेर्दक्षि
णतो ब्रह्मासनं तत्पश्चाद्यजमानस्य॥उत्तरवेदेरुत्तरतः प्रणीतायाः॥उत्तरवेदेरुत्तरश्रोण्या
होतुः॥गार्हपत्यस्य पश्चात्पत्न्याः॥उत्तरश्चाग्नीध्रः॥ततोध्वर्युरुत्तरवेद्यां पात्राण्यासादयेत्॥
स्फ्यं च शूर्पकपालानि च शेषं वैश्वदेववत्॥स्थाता दक्षिणवेद्यां स्फ्यं चामिक्षास्थालीं च मेक्ष
णं च॥अग्निहोत्रहवणीं च जुहूं च कृष्णं चोपभृतं च स्रुवं च ध्रुवां च आज्यस्थाल्यौ च वेदं च
युद्धरणपात्रीं च वेदपरिवासनं चोपवेषं चेध्मप्रव्रश्चनं च दर्भं च॥ब्रह्मा मंत्रेण निरसनोप
वेशनं कुर्यान्न ब्रह्मजपं॥न यजमानो भूपतरति॥अध्वर्युः पृष्ठ्यां प्राक्तनवेद्यां स्तृणाति॥

उभौस्वस्ववेद्युत्तरतःपवित्रेकुरुतः॥अध्वर्युरेवोत्तरेणागार्हपत्यमुपविश्यपरिक्रमिहस्ताच्चमसमा
दायतस्मिन्नुदगग्रेपवित्रेनिधाये त्यादि॥प्रणीतउत्तरवेदेरुत्तरतःप्रणीयसश्रूर्पामग्नेहोत्रहव
णीमादत्ते॥स्छातामिहोत्रहवणीमेव॥वेषायत्वे त्यादायोक्षोप्रत्युष्टमितिप्रतितपतः॥अध्वर्युः
पृषांतंवैश्वदेवबन्निरुप्येंद्राग्निभ्यांकायेतिनिर्वपेत्॥ततःउभौगार्हपत्यस्योत्तरतःस्वस्वप्रोक्ष
णीसंस्कारंकुरुतः॥उत्तरतोध्वर्युर्दक्षिणतःस्छाता॥उपवेशनक्रमः॥अध्वर्युर्यथादेवतंहवी
षिप्रोक्ष्यपुनर्देवस्यत्वा॰वरुणायत्वाजुष्टंप्रोक्षामीतिसश्रूर्पाणिकरंभपात्राणिप्रोक्ष्यमेषमेषी
शमीपर्णीकरीरसक्तूनप्रोक्षेत्॥मेषतदीयशमीपर्णीभ्योन्यत्स्रुतिप्रस्छातावा॥मंत्रेणोभयोः
स्वस्वपात्रप्रोक्षणं॥अध्वर्युस्तुषान्निरस्यशेषानवप्रतार्थान्निदध्यात्॥तंडुलक्षालननि

नयनांते॥स्छातामारुत्यैअध्वर्युर्वारुण्यैहोहयति॥अथाध्वर्युरग्नयेसवित्रेपूष्णइंद्राग्निभ्यांकाये
त्यधिवपेत्॥कपालोपधाने-अध्वर्युः ऐंद्राग्नांतान्युपदध्यात्॥ततःस्छातापूर्वयत्प्रातर्दोहं॥ततो
ध्वर्युःप्रातर्दोहमधिश्रित्यएककपालमुपदध्यात्॥अधिवपनवत्संवपनंपूषवर्जं॥अध्वर्युराग्ने
यमधिश्रित्याज्यदधिनीनिरुप्यापूर्वाज्यंनिर्वपति॥अध्वर्युणाऐंद्राग्नांतेषधिश्रितेषुस्छातामा
रुतीप्रातर्दोहेसायंदोहमानीयवाजिनविभागांतंकुर्यात्॥अथैककपालमधिश्रित्यत्वचंग्राहयि
त्वाकरंभपात्रमेषशमीपर्णीकरीरसक्तुभिःसहस्वहवीषिपर्यग्निकरोति॥स्छातामेषीशमीपर्णीधे
षिकैःसहस्वहविः॥अध्वर्युःपाशुकवेद्यामाप्यनिनयनांतंकुर्यात्॥उभौस्वस्ववेदिसमीपेवेदादा
नादिकुरुतः॥अध्वर्युःपाशुकवेदिंविमायपुरःप्रत्यग्निवत्परिस्तृणीयात्॥ततःपाशुकीवेदिं
संमार्ष्टि॥परोदक्षिणां॥उभौस्तंबयजुषीसहहरतः॥अध्वर्युर्बर्हिर्मृदंचोत्करेन्युप्यतत्रैवनिष्ठेत्॥

ज्येनिरुप्य

५ ततोध्वर्युर्वारुणीप्रातर्दोहेसायंदोहमानीयवाजिनविभागांतंकुर्यात्॥५

स्ताभिरिपाशुक्याः पश्चाद्भागेनाहत्य न्युप्य गतेसति प्रत्यागच्छेत्॥ एवं चतुर्थीतं॥ उभौ पूर्वौ परिग्राहौ
परिगृहीतः॥ अध्वर्युरेवाह॥ इमे नरः वृणुत वेदीं एतस्य वसुमतो रुद्रवतो आदित्यवतो वर्ष्मन्दिवे नाभा॰॥
उभौ वेद्यां ह्वननं कुरुतः॥ अध्वर्युराह॥ अग्नीदितश्चामुतश्च त्रिस्त्रिर्हर॥ आग्नीध्रः उत्तरवेदिमुदहृत्वा
दक्षिणवेदिमुदहरति॥ अध्वर्युः स्फ्यमुदपात्रं लौकिकं बर्हिः शम्याभित्येतत्समादाय एहि यज्ञमा
नेत्युक्त्वा यजमानपत्नीभ्यां सह चात्वालदेशं गच्छेत्॥ तत्र प्राङ्मुख उपविश्य चात्वालदेशं स्फ्येनोद्धृ
त्यावेक्ष्य तस्य पूर्वभागे उदीचीनकुंबां शम्यां निधाय तदंतः समीपे स्फ्येनोदगपवर्गमालिखति॥
वित्तायै नीमसि॥ दक्षिणतः पूर्ववत्प्रागपवर्गं॥ तिक्तायै नीमसि॥ पश्चिमतः पूर्ववदुदगपवर्गं॥ अ
र्वतान्मानाथितं॥ उत्तरतः प्रागपवर्गं॥ अर्वतान्माव्यथितं॥ उदगग्रं बर्हिश्चात्वाले निधाय यज्ञ
मानपत्नीभ्यामन्वारब्ध स्तन्मूले स्फ्येन प्रहरति॥ विदेरग्निर्नभो नामाग्नेरंगिरो भ्रौस्यां

पृथिव्यामसि॥ छिन्नं बर्हिर्मूलसहितमुदमादत्ते॥ आयुषा नाम्नेहि॥ तामुत्तरवेद्यां निवपति॥ य
त्तेनाध्वर्युनामयज्ञियं तेन त्वादधे॥ एवं द्वितीयादौ॥ यो द्वितीयस्यां॰ यस्तृतीयस्यामिति तत्र विशे
षः॥ तूष्णीं चतुर्थं सहशोषबर्हिषा॥ स्फ्येन चात्वालान्मृदमुद्धृत्याह॥ अग्नीदितस्त्रिर्हर॥ सहशो
त्तरवेद्यां त्रिर्निवपति॥ अध्वर्युस्तां मिश्रयति॥ सिंहीरसि महिषीरसि॥ समीकरोति॥ पुरुप्र
थस्वोरुतेयज्ञपतिः प्रथतां॥ स्फ्येन दृढयति॥ ध्रुवासि॥ उदपात्रस्थाभिरद्भिः प्रोक्षति॥ देवेभ्यः
शुंधस्व॥ सिकताभिरनुप्रकिरति॥ देवेभ्यः शुंभस्व॥ शम्ययामीत्योत्तरनाभिं कृत्वा दर्भैः प्रच्छादय
ति॥ ततोध्वर्युस्त्रातारौ त्रिप्रादेशौ रपरिमितैः काष्ठैर्बहुविधमावाहव नीये मूलतो दीपयि
त्वा चात्वालमृत्पूर्णपात्रे तदुत्तरतः स्थापयतः॥ अध्वर्युरपूर्वाज्यं जुहोति तूष्णीं पंचकृत्वो गृहीत्वा
परिक्रमिणे प्रयच्छति॥ स्त्रातापि सस्रुवामपूर्वाज्यस्थाली मादायांतरेण चात्वालोत्करावग्रे

स्थातरि पाशुक्याः पश्चाद्भागेनाहत्य न्युप्य गते सति प्रत्यागच्छेत्॥ एवं चतुर्थीतं॥ उभौ पूर्वौ परिग्राहौ
परिगृहीतः॥ अध्वर्युरेवाह॥ इमे नेरः वृणुत वेदीं एतस्य वसुमतो रुद्रवतो आदित्यवतो वर्ष्मेदिवो नाभा॰॥
उभौ वेद्यङ्गनं कुरुतः॥ अध्वर्युराह॥ अग्नीदितश्चामुतश्च त्रिस्त्रिर्हर॥ आग्नीध्रः॥ उत्तरवेदिमुद्दृत्वा
दक्षिणवेदिमुद्दरति॥ अध्वर्युः स्फ्यमुदपात्रं लोकिकं बर्हिः शम्याभित्येतत्समादाय एहि यज्ञमा
नेत्युक्त्वा यजमानपत्नीभ्यां सह चात्वालदेशं गच्छेत्॥ तत्र प्राङ्मुख उपविश्य चात्वालदेशं स्फ्येनोद्धृ
त्यावोक्ष्य तस्य पूर्वभागे उदीचीनकुंबां शम्यां निधाय तदंतः समीपे स्फ्येनोदगपवर्गमालिखति॥
द्वित्रार्थं नीमेसि॥ दक्षिणतः पूर्ववत्प्रागपवर्गं॥ त्रिकार्थं नीमेसि॥ पश्चिमतः पूर्ववदुदगपवर्गं॥ अ
र्वतान्मानाधितं॥ उत्तरतः प्रागपवर्गं॥ अर्वतान्माध्यधितं॥ उदगग्रं बर्हिश्चात्वाले निधाय यज्ञ
मानपत्नीभ्यामन्वारब्ध स्तन्मूले स्फ्येन प्रहरति॥ विदेरग्निर्नभो नामाग्ने अंगिरो यो स्यां

पृथिव्यामसि॥ छिन्नबर्हिर्मूलसहितं मृदमादत्ते॥ आयुषा नाम्नेहि॥ तामुत्तरवेद्यां निवपति॥ य
त्ते नाध्यष्टं नाम यज्ञियं ते नस्त्वादधे॥ एवं द्वितीयारो॥ यो द्वितीयस्यां॰ यस्तृतीयस्यामिति तत्र विशे
षः॥ तूष्णीं चतुर्थं सहशोषबर्हिषा॥ स्फ्येन चात्वालान्मृदमुद्धृत्याह॥ अग्नीदितस्त्रिर्हर॥ सहृत्वो
त्तरवेद्यां त्रिर्निवपति॥ अध्वर्युः स्तां मिश्रयति॥ सिंहीरसि महिषीरसि॥ समीकरोति॥ पुरुप्र
थस्वोरुतैयज्ञपतिः प्रथतां॥ स्फ्येन दृढयति॥ ध्रुवासि॥ उदपात्रस्थाभिरद्भिः प्रोक्षति॥ देवेभ्यः
शुंधस्व॥ सिकताभिरनुप्रकिरति॥ देवेभ्यः शुंभस्व॥ शम्ययामीत्योत्तरनाभिं स्फ्यादर्भैः प्रछादय
ति॥ ततोध्वर्युस्त्रातारो त्रिप्रादेशोरपरिमितैः काष्ठैर्बहुविधमावाहवनीयेमूलतोदीपयि
त्वा चात्वालमत्पूर्णपात्रे तदुत्तरतः स्थापयतः॥ अध्वर्युरपूर्वाज्यं जुहूं तूष्णीं पंचस्रुवो गृहीत्वा
परिक्रमिलो प्रयच्छति॥ स्त्रातापि सस्रुवामपूर्वाज्यस्थाली मादायांतरेण चात्वालोत्करावग्रे

णोत्तरवेदिं परीत्य स्वबेधां सादयित्वा पुनरागच्छति॥ अध्वर्युस्तूष्णीमुत्पूतालोकिकप्रोक्षणी
र न्यहस्ते॰ देवदारुसुगंधितृणगुग्गुलुमेषशृंगांतरालस्थरोमाणीति ब्रह्महस्ते प्रयच्छति॥
ब्रह्माशुचिर्भूत्वा तीर्थेन प्रपद्याग्रेणाहवनीयं गत्वा निरसनादिजपांतं कृत्वा वाग्यत आस्ते
इति केचित्॥ अध्वर्युः अग्नये प्रणीयमानायानुब्रूहि अग्नीदेकस्य यथानुसंदेहीत्याह॥ अ
ग्निष्यां प्रणीयमानाभ्यामिति वा॥ ततो मृत्पूर्णशरावे स्वमिध्ममादायोत्तरत स्तिष्ठति॥
स्थाता तदुत्तरेणागत्य तदिध्मस्य शालामुखीयस्य च मध्येन गत्वा प्रदक्षिणमावृत्य प्रसव्यमु
खो मृत्पूर्णशरावे स्वमिध्ममादायापसलैः पर्यावृत्य गच्छति॥ आहवनीयं रक्षतः॥ होत्रा
यमुष्येत्यारब्धेस्वमग्निमा दायपत्नीयजमानाभ्यामन्वारब्धो ध्वर्युरुत्तरेणोत्तरवेदिं
गच्छेत्॥ तदेवसर्वे प्रोक्षणपादीनुद्यच्छंते॥ आग्नीध्रस्तु पश्चाद्धोत्रस्थानमारभ्योत्तरश्रो

रामरस्म
१९

लिपर्यंतं स्फ्यं नलेरवयाहोतुः पदं प्रच्छादयन्नेति॥ ब्रह्मा दक्षिणतो व्रजन्नपति॥ आशुः
शिशानो॰ नाधृष्यायथासिथेति सूक्तसमाप्तौ निरसनादिजपांतं कुर्यात्॥ सर्वेध्वर्युमनु
गच्छंति॥ अध्वर्युरुत्तरवेदिसमीपं गत्वान्यहस्ते अग्निं दत्वा प्रोक्षणीरादाय प्रागादिक्रमे
णमध्ये समापयन्नुत्तरवेदिं प्रोक्षति॥ इंद्रघोषस्त्वावसुभिः पुरस्तात्पातु॥ मनोजवास्त्वा
पितृभिर्दक्षिणतः पातु॥ अप॰॥ प्रचेतास्त्वा रुद्रैः पश्चात्पातु॥ अप॰॥ विश्वकर्मा त्वा
दित्यैरुत्तरतः पातु॥ ततः प्रोक्षणीशेषमुत्तरवेद्या दक्षिणांसे निनयेत्॥ परिक्रमिह
स्ताज्जुहूमादाय तन्मुखे हिरण्यं लंबयित्वा दक्षिणांसमारभ्य यावन्मध्यं व्याघारयति॥
सिं॰ हीरसि सपत्नसाही स्वाहा॥ उत्तरश्रोणिमारभ्य यावन्मध्यं॥ सिं॰ हीरसि सुप्रजा
वनिः स्वाहा॥ दक्षिणश्रोणिमारभ्य यावन्मध्यं॥ सिं॰ हीरसि रायस्पोषवनिः स्वाहा॥

उत्तरांसमारभ्ययावन्मध्यं॥सिंहीरेस्यादित्यवनिःस्वाहा॥मध्येव्याघारयति॥सिंहीरस्यावहदेवान्देवयुतेयजमानायस्वाहा॥सर्वत्रोत्तरवेधाइदं॥अध्वर्युःस्रुचमुद्गृह्णाति॥स्रुतेभ्यः स्वा॥ततोब्रह्महस्तात्संभारानादायनाभेःपश्चादारभ्यदेवदारुपरिधीन्परिदधाति॥मध्यमं॥विश्वायुरसिपृथिवीदृंह॥अथदक्षिणं॥ध्रुवक्षितिर्दृंह्यंतरिक्षंदृंह॥अथोत्तरं॥अच्युतक्षितिर्दिवंदृंह॥अतिशिष्टान्संभारानुत्तरनाभौनिवपति॥अग्नेर्भस्मासिस्वाहा॥व्याघारशेषेणसंभारान्तूष्णीमभिघारयति॥प्रदक्षिणमावृत्याग्निंगृहीत्वोत्तरवेदेःपुरस्ता - त्प्रसव्यंस्तिष्ठन्संभारेष्वग्निंप्रतिष्ठापयति॥यज्ञं प्रतितिष्ठसुमतोसुशेवाआत्वावसूनिपुरुधाविशंतु॥दीर्घमायुर्यजमानायकृण्वन्मध्वामृतेनजरितारमङ्धि॥तूष्णीवा॥बोधिगोपोमिसृगंतेहोतुरव

सानेऽध्वर्युःस्वेध्मंविस्रस्यत्वालपित्वापरिसमुह्यपर्युक्ष्यपरिस्तीर्ययजमानान्वारब्धोःपूर्वाज्येनसकृद्गृहीतेनचतुर्गृहीतेनवाजुह्वाजुहोति॥अग्निर्यज्ञंनयतुप्रजानन्नेनंयज्ञंहनोविदन्॥देवेभ्यःप्रब्रूताद्युज्ञंप्रप्रयुक्तपतिंतिरस्वाहा॥अग्नयेयज्ञपतयइदं॥अध्वर्युःपुनर्गृहीत्वाजुहोति॥वायुर्यज्ञं॰तिरस्वाहा॥य॰वायवेयज्ञपतयइदं॥पुनर्गृहीत्वा॥सूर्योयज्ञं॰तिरस्वाहा॥सूर्याययज्ञपतयइदं॥पुनर्गृहीत्वा॥यज्ञोयज्ञं॰तिरस्वाहा॥यज्ञायज्ञपतयइदं॥ततोयजमानःस्वयंसकृद्गृहीतेनजुह्वाजुहोति॥अग्निरन्नादोन्नपतिरन्नस्येशोसमेन्नंददातुस्वाहा॥अग्नयेन्नादायेदं॥पुनर्गृहीत्वा॥वायुःप्राणदाःप्राणस्येशोसमेप्राणंददातुस्वाहा॥वायवेप्राणदइदं॥पुनर्गृहीत्वा॥आदित्योभूरिदाभूरिंमानांपृणानामीशोसमेभूरिमानांपृणानांददातुस्वाहा॥आदित्यायभूरिदइदं॥स्वाहाकृतिपाशुक्यावेदेःपश्चाद्दक्षिणतोगत्वादूर्या

अतोधातोरित्यालापः

वेद्योर्मध्येनप्रागत्वा प्रदक्षिणमावृत्य प्रत्यङ्मुखस्तिष्ठन्नध्वर्युणास्वाग्रोप्रतिष्ठापितेस्ववेदि
पूर्वार्धेस्वाग्निंप्रतिष्ठापयेत्॥ ब्रह्मणोसन्नसमाप्तौनिरसनादिजपांतेयजमानोदक्षिणवेदि
दक्षिणतःस्वस्थानेस्थित्वाभूर्पतरुतिवदेत्॥अथस्थातास्वमिध्मंविस्रस्यपरिसमुह्यपर्यु
ह्यपरिस्तीर्ययजमानान्वारब्धः अध्वर्युवच्चतस्रआहुतीस्तूष्णीजुहोति॥अध्वर्व्याहुतिश्चि
वतथाजमानं॥उपयमनेवेद्यंतरालेनिक्षिपतः॥अध्वर्युरेवब्रह्मलुत्तरोपरिग्राहोपरिगृही
ष्यावः॥ब्रह्मा ओंपरिगृह्णीतं॥उक्तोपरिग्राहोमंत्रावृत्याकुरुतः॥तिर्यचोस्फ्योस्तब्ध्वाति
ष्ठतः॥अध्वर्युरेवाह॥प्रोक्षणीरासादयतमिध्मावर्हिषीउपसादयतःस्रुवोचस्रुचश्च
कृतोचसंमृष्टंपत्नीःसन्नह्याज्याभ्यांदध्वाचोदेतं॥आग्नीध्रः अग्नेणगार्हपत्यंस्थिताः
प्रोक्षणीःस्वप्रोक्षण्याहरणार्थमागच्छतःस्थातुर्दक्षिणेनहृत्वोत्तरवेद्याःस्फ्यस्य

वर्त्मनिसादयति॥दक्षिणस्यांप्रेषार्थकर्तास्थातेव॥उत्तरवेदिमग्रेणपाशुबंधिकीमपरेणवा
तत्संचारः॥अग्नीदेवपत्नीःसंनह्यतयोपयोराज्यावेक्षणेमंत्रावृत्याघृतेआज्यदधिनीगा
र्हपत्येधिश्रित्यप्रकृतिवदध्वर्यवेप्रयच्छति॥स्थातापितहृत्वास्ववेद्या मासा
दयति॥यजमानो वेदिसंधौप्राङ्मुखउपविश्यक्रमेणदक्षिणोत्तराज्येमंत्रावृत्यावेक्षेत॥
ततोध्वर्युर्वैश्वदेववत्॥स्थातादर्शवदितियुगपदाज्यानिगृह्णीतः॥यजमानःस्वस्थानस्थो
युगपदनुमंत्रयते॥पुंचानांवांवातानांयुं॥पुंचानांवांमरुतां॥पुंचानांवांदिशां॥पुंचानां
वांपंचजनानां॥ चुरोर्वां॥ब्रह्मणोवां॥क्षत्रस्यवामोजः॥विशोवां॥सुवीर्यायवां॥सु
प्रजास्त्वायवां॥रायस्पोषायवां॥ब्रह्मवर्चसायवां॥क्षत्रस्यार्कं॥हविर्देवानां॥आशिषो
यजमानस्य॥देवानांवांदेवं॥कामायवां॥अध्वर्युःपंचविधंस्थातात्रिविधंबर्हिस्तृणाति॥

परिध्यनुमंत्रणे॥ध्रुवौस्थोध्रुवौहꣳसं०वित्॥ध्रुवौस्थध्रुवौहꣳ०वित्॥अक्षिंध्रुवौस्थोक्षि०॥
पुनर्मिवांब्रह्मणादेवैर्नहव्यायास्मै॥इंधानावाꣳ०वुर्यवौ॥आज्यस्थाल्याद्यादायोपो
गार्हपत्यस्यपश्चादुपविशतः॥दक्षिणोध्वर्युरुत्तरतःस्थाता॥ततःस्थातामारुतीम तो३
नभिघारितांस्वस्थानेधिश्रित्यहविषांपुरस्तान्नीलातदक्षिणतःस्थापयेत्॥अध्वर्युः
स्योनंतुइत्यादिनात्रिर्दारुपात्रांसक्रूदाशयपात्रेचोपस्तीर्यऐंद्राग्नांताभ्युद्वासयति॥त
तःस्थातामारुतीयथावत्पुनरधिश्रित्यतूष्णीचमसमुपस्तीर्यतामभिघार्योद्वास्यैक
देशंभ्युद्धृत्यतत्रमेषीनिधायतदग्रेप्०००शमीपर्णानिकरीरसक्तूनामिक्षास्तोकंचनिरव
शेषंनिधायवाजिनमानीयाभिघार्यालंकरोति॥यस्तेश्रालाꣳमह्यमिति॥ततोध्वर्युः
स्वामिक्षांस्थानेधिश्रित्यतूष्णीचमसमुपस्तीर्यवारुणीमभिघार्योद्वास्यतदेकदेशंभ्यु

द्धृत्यतत्रमेषादिनिधायसावशेषमामिक्षास्तोकंनिधायवाजिनमानीयाभिघार्यालंकृत्यैक
कपालमुद्वासयति॥वारुणीनिष्क्रासमवभृतार्थंस्थापयति॥ऐंद्राग्नांताभ्युत्तरवेद्यामासा
द्यस्थात्रासमेक्षणामारुत्यामुत्तरवेदेःपुरस्तादाहरणपूर्वकंस्ववेद्यामासादितायांवारुणी
समेक्षणामेककपालंचासादयति॥यꣳआसादनक्रमेणाभिमंत्रयते॥वाजिनासादनमंथनेवै
श्वदेववत्॥अध्वर्युरेवेध्मासमिधमाददानआह॥अग्निभ्यांसमिध्यमानाभ्यामनुब्रूहीति॥
उक्तोसहाधत्तः॥अग्निभ्यामिदꣳ॥इध्मावाधीयमानावनुमंत्रयते॥उच्छुष्मावग्नीयजमाना
यस्तेनिशुष्मावभिदासंते॥अग्नीदेवेद्वोमन्विद्वोमंईजिद्वो॥तथैवाघारावनुमंत्रयते॥मने
सीस्वः प्राजापत्येमनसामाभूतेनाविशतं॥अध्वर्युःअग्नीपरिधीꣳश्चाग्निंचत्रिस्त्रिःसंम
ृष्टि॥अग्नीदुत्तरपरिधिसंमार्गंदक्षिणपरिधिसंमार्गंचकृत्वोत्तराग्निसंमार्गंकरोति॥नदक्षि

णस्य॥स्ज्ञातासंमृष्टे दक्षिणेऽग्नौ स्वस्थानस्थां पत्नीं पृच्छति॥पत्नि कस्ते जारः॥सा॥हा॥पाप्मा
२३ मे जारः॥स्ज्ञाता॥तं वरुणो गृह्णातु॥करंभपात्रालिं शूर्पे निधाय पत्न्यै प्रयच्छति॥तां शिर
सि किंचिन्निधाय तदुपरि धृतं शूर्पं दक्षिणेनान्वाहार्यपचनं दक्षिणेन हवेदीं परीत्य प्राचीमु
दानयन्वाचयति॥प्र घास्यान्हवामहे मरुतो युक्तवाहसः॥कुरंभेण सुतोषसः॥अध्वर्युः उत्त
रमार्गेणागत्य दक्षिणस्याग्नेः पुरस्तात्प्रसव्यं स्रुवस्तिष्ठेत्॥तथैव तद्दक्षिणां यजमानः॥दक्षि तो
णतः पत्नी॥यजमानः शिरसि किंचिन्निधाय पत्नी हस्ताच्छूर्पं गृहीत्वा स्वशिरसि निधाय अप्रण
वं पुरोनुवाक्यामन्वाह॥मोषू णः इंद्र पृत्सु देवास्तं स्मते शुभिन्नवया॥मही ह्यस्य मीढुषो पुत्या
हविष्मतो मरुतो वंदते गीः॥अथ पत्नी यजमानाध्वर्यवौ यत्यांवदेयुः॥यद्ग्रामे यदरण्ये यत्स
भायां यदिंद्रिये॥यच्छूद्रे यदर्यएनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहा॥ २३

तदग्नौ जुहुयात्॥शूर्पमनुप्रहरेत्॥यं वरुणाय देवं॥अध्वर्युः पृथग्गच्छतः स्वितरानुमंत्रयते॥अ
ङ्कुन्कर्मकर्मकृतः सहवाचामयोभुवा॥देवेभ्यः कर्मकृत्वास्तं प्रेत सुदानवः॥ततः स्ज्ञाता दक्षिणमग्निं सं
मार्ष्टि॥अग्नेवा जजिदिति॥भुवनमसीत्यादि तुल्यमुभयोः॥यजमानः स्रुग्घ्याघारं प्रतिप्रस्ज्ञातारं
कूरेणाध्वर्युर्दर्भेणान्वारभते॥पुग पदनुमंत्रयते॥वाचोस्छ ऐंद्रो सपलक्षयं ऐयो वाचामैंद्रियेणा
विशतं॥अध्वर्युरेव प्रवरं वृणीते॥घृतवतीशब्दश्रवणे उपावत्यात्क्रम्यतिष्ठतः॥अध्वर्योरेवाश्रा
वणादि॥स्ज्ञातुः क्रियामात्रं॥चतुर्थाष्टमयोः समानयमानोऽध्वर्युरष्टमे सर्वं समानयति॥अर्धस्ज्ञा
ता॥वैश्वदेवं च नव प्रयाजानिष्ट्वाध्वर्युरेंद्राग्नानन्यभिघारयति॥ततः स्ज्ञाता ध्रुवामिक्षोपघ्र
ल तः॥अथाध्वर्युर्बर्हिरेयेकं कपालं पृषदाज्यं च॥उपावान्यभागो यजतः॥ततः स्ज्ञातोपरमति॥अध्व
र्युरैंद्राग्नानन्यजति॥ततः स्ज्ञाता जुहूमुपस्तीर्य मरुद्भ्यो नुब्रू३हि इत्युक्त्वा शमीपर्णकीरस

क्षामिक्षास्तोकानामर्धमवदायाद्वितीयावदानेनावशिष्टं तदर्धमामिक्षांशेषयित्वावदायमेषी
चसर्वामवदायाभिघार्य तूष्णीं प्रत्यभिघार्यात्याक्रम्याश्राव्याग्नीध्रेणास्वस्थानस्थेनप्र
त्याश्रावितआहमरुतोयजेति।वषट्कारेजुहोति।।य॰मरुद्भ्यइदं॰।।मरुतोमहदैवयुज्यया
प्राणेऽध्यासं।।ततःस्थातापरमति।।अध्वर्युर्बर्हिषीमारुतिवज्जुहोति।।मेषीस्थानेमेषइ
तिविशेषः।।य॰वरुणायेदं॰।।वरुणस्याहंदैवयुज्यायाधर्मभाक्॰।।एककपालयागांते।।य॰
कायेदं॰कस्याहं॰।।त्रिष्टोभ्यासं।।सं॰स्त्रावेणहोमः।।उपहोमपक्षे।।नभश्चस्वाहा।।नभ
स्यश्चस्वाहा।।इषश्चस्वाहा।।ऊर्जश्चस्वाहा।।इत्याहुतयः।।यथालिंगंत्यागः।।अध्वर्युर्जुह्वामु
पस्तीर्यअग्नयेस्विष्टकृतेऽनुब्रूहीत्युक्त्वाऐंद्राग्नांतान्यवदधात्।।ततःस्थाताजुह्वामुपस्ती
र्यमारुतीमवदायद्विरभिघारयति।।ततोऽध्वर्युर्बर्हिषोमवदायाज्ञायाश्चावदायद्विरभि

समाधिभंग

घारयति।।स्वमेक्षणान्यादायासाक्रम्यपागांतेस्वमेक्षणान्यनुप्रहरति।।स्थातुर्नमेक्षणा
रानानुप्रहरणे।।अध्वर्युरेवप्राशित्रमवद्यति।।इडापात्रमुपस्तीर्यऐंद्राग्नांतान्यवदायइ
डापात्रंस्थात्रेप्रयच्छति।।समारुतीमवदायाभिघार्याध्वर्यवेप्रयच्छति।।सवारुणेयेकपालयो
रवदायमारुतीवर्ज्यमभिघार्यहोत्रेप्रयच्छति।।स्थाताप्यन्वारभते।।उपहूताद्युक्तो ब्रूतां।।चतु
र्धाकरणमध्वर्योरे वरतिकेत्रावमतेभाष्यमतेविकृतिषुनचतुर्धाकरणं।।उपहूतयोःस्वांस्वा
मसंसृष्टामध्वर्यूप्राश्नीतइतरेसर्वेसंसृज्यप्राश्नंतीतिधूर्त्तः।।द्वादशगाःसान्नाहार्यादद्यात्।।
वाजिनासादनादिवैश्वदेवत्।।ब्रह्मन्प्रस्था॰।।अग्नीदुत्तरतःकरोति।।दक्षिणतःस्थाता।।ए
तदस्तुहुतंतवैतंतंकुरुतः।।उभौनवानुयाजान्यजतः।।उभौवाजवतीभ्यांस्रुचौपृथग्व्यूहतः।।
तत्रदक्षिणतउदस्योत्तरतउदस्यति।।अध्वर्युरेवाश्रावयति।।इषितेसपिसंप्रेष्यति।।एजिति

भक्षणेस्थाताप्रेष्टः।।५

पाल

वाचनेऐंद्राग्नांतमध्वर्युः॥ मुहूर्तामुहूर्मिति स्छाता॥ वरुणस्य कुस्येत्यध्वर्युः॥ सशास्वा पवित्रौ
प्रस्तरावुभौ प्रहरतः॥ प॰ रोहितेन वामुग्निर्देवतां गमयतु हरिभ्यां वामिंद्रो॰ ऐतशेन वाऽ
सूर्यो॰॥ अध्वर्युरेवाह॥ अग्नीत्॥ सआह॥ संवदेथां॥ अध्व॰ अगतमग्नीत्॥ आग्नीध्र॰॥
अगतं॥ अध्व॰ श्रावय॥ आग्नी॰ श्रोषट्॥ अध्व॰ इमे ब्रूहि॥ आ॰ अनुप्रहरतं॥ परिध्यनु
मंत्रणे॥ वितेमुंचामी त्यादौ नोहइति भवः॥ पक्षे विर्वामुंचामि॰॥ धुक्तमुस्मा॰ व्रतंभागुधां॰॥
उभौ उत्तरेस्वस्वस्थयोः स्रुग्विमोकं कुरुतः॥ वाजिनयागेउभावस्याक्रामतः॥ अध्वर्योरे
वाश्रावणादि॥ उभौ यजतः॥ वैश्वदेववद्वाजिनयागांते॥ स्छाताश्च पात्रशेषमध्व
र्युपात्रे निक्षिपेत्॥ स्छातोपहवेत्तृतीयोपक्षे चतुर्थः॥ अध्वर्युरेवपत्नीः संयाज्यदाक्षि
णाग्निकोजुहोति॥ तत्र स्वस्यस्छातुश्चेध्मप्रव्रश्चनयोर्युगपदभ्याधानमिति विशेषः॥

युगपदुभौ वेदौ यजमानाय प्रदायवाचयीत॥ वेदौ स्छो विनीस्छो विदेयुर्मणीस्छः कुरुते
स्छः क्रियासंसुनीस्छः सनितारौस्छः सुनेयं॰ वेदौ दत्तौ वाजिनं॥ नपत्नीव्रतविसर्गइति केचित्॥
आप्यायतामि त्यादिप्रायश्चित्तहोमांतमुभयोः॥ यजमानोयुगपदनुमंत्रयते॥ आ
प्यायेतां ध्रुवेघृतेन॰ गुरुधारे पृथिव्योयुज्ञे अस्मिन्॥ अध्वर्युः वैश्वदेववत्समिष्टयजुर्जु
हुयात्॥ प्रयुतिवदितरः॥ उत्तरवेद्यामेव प्रणीताविमोकः॥ ब्रह्मोपस्छानविष्णुक्रमव्र
तविसर्गांतं॥ नव्रतविसर्गइति केचित्॥ प॰ यज्ञविमोकांतेउपवेषो युगपदुत्तरउपगृ
हेत्॥ योदेवामनुष्येषूपवेषावधारयन्॥ येअस्मदर्पचेतसस्तानस्मभ्यमिहाकुरुतं॥ उ
पवेषावुपविष्टनः प्रजापुष्टिमथोधनं॥ द्विपदोनश्चतुष्पदोध्रुवाननपगाकुरुतं॥ ॥
॥ अथावभृथः॥ ॥ पक्षेयजमानः पयस्वतीरित्याद्युत्तरेणोव्रतग्रहणं कुर्यात्॥ ततोध्वर्यु
स्तूष्णीमसि दमाहायदर्भमुष्टिंवेदं चकृत्वाकर्मणेवामितिपाणी संमृश्यगार्हपत्योत्तर

वेदिकोसर्वान्वापरिस्तीर्यपाशुकवेद्यांस्रुगेषुस्फ्यमग्निहोत्रहवणीमुद्दंस्रुवमाज्यस्था
लीवेदंध्रुवरणास्थालीपोत्रंवेदपरिवासनंचहृदातयेत्रणंचेत्यासाद्योत्तरवेदिसमी
पेतूष्णीब्रह्माणंयजमानंचोपवेश्यगार्हपत्यादोत्तरवेदिकांतंयत्रत्येतिष्ट्यांस्तृणा
ति॥इमोप्राणापानाविति पवित्रेहृत्वायजमानवाचंयच्छेत्युक्त्वावेषायत्वेत्यग्निहोत्रहव
णीमादायप्रत्युष्टमितिनिष्टप्यप्रकृतिवत्प्रोक्षणीःसंस्कृत्यसनिष्कासानिपात्राणिप्रो
क्षति॥शुंधध्वमिति॥मुहीनामित्याज्यंनिरूप्यगार्हपत्येधिश्रित्य सनिष्कासंपर्यग्नि
कृत्यतूष्णीस्फ्यमादायवेद्यांति यंचंस्तृध्यासंप्रेषमाह॥प्रोक्षणीरासादयस्रुवंचस्रु
चंचसंमृष्टिपलीःसंनह्याज्येनोदेहि॥योमाहृदेतिस्फ्यमुदस्यति॥अग्नीधथाप्रेष
सर्वंकरोति॥तस्याग्रेवृंतेजिघ्रेनेतिविशेषः॥अध्वर्युराज्यमसीत्यादियजमानमवेक्ष

यित्वाअग्नेर्जिह्वासीति स्वयमवेक्ष्यशुक्रमसीत्युत्पूयस्रुधृतिलप्रुडुर्भ्यां वेतिसपवित्रप्रोक्षणी
निनयनांते॥विष्णुसिवेष्णुवंधामासिप्राणापुत्रमित्याज्यमंत्रमंत्रनिष्कासंगार्हपत्येधिश्रित्य॥
अभिघार्य ध्रुवरणपात्रेतूष्णीमुपस्तीर्यतस्मिन्निष्कासमुद्धृत्याभिघार्यसान्नाय्यवदलंकृत्य
वेद्यामासादयति॥भूर्भुवःसुवरिति॥यजमानेनासन्नाभिमंत्रणेकृतेआज्यस्थालीसस्रुवां
मुद्दंबर्हिर्वेदंनवेवाससीवारुणीनिष्कासंतुषांश्चेत्यादायतिष्ठतिपरिक्रमेस्फ्यपरिमोजनी
यदर्भान्समिधआदायास्ते॥अध्वर्युराह॥एहियजमानेति॥अंतरेणचालालोत्करोयज
मानपत्नीभ्यांसहसर्वेप्युदङ्निष्क्रामंति॥उरुःहिराजाव रुणश्चकारसूर्यायपंथामन्वेतवाउ॥
अपदेपादाप्रतिधातवेकरुतापवक्ताहृदयाविधश्चित्॥अपांतीरंगच्छति॥तादृष्ट्वायजमानंवा
चयति॥शतंतेराजन्भिषजःसहस्रमुर्वीगंभीरासुमतिष्टेअस्तु॥बाधस्वदूरेनिर्ऋतिंपराचैः

धूतं चिदेनः प्रमुमुग्ध्यस्मत्॥ अपां समीपमधितिष्ठंति॥ अभिष्ठितो वरुणस्य पाशैः॥ अवभृ
थार्थेयां दिशं गताः सैवतत्र प्राचीतामनूपतिष्ठंत एव प्रचरंति॥ अध्वर्युः अप्सु बर्हिः प्रास्य
ति॥ अग्नेरनीकमुप आविवेश॥ अपां नपात्प्रतिरक्षन्नसुर्यो दमे दमे समिधं यक्ष्यग्ने॥ बर्हि
रपास्य चतुरस्राकारं संबध्य परिस्तीर्य तस्मिन्नाघारवत्स्रुवाहुतिं जुहोति॥ प्रतितेजिह्वा घृत
मुच्चरण्यु स्वाहा॥ य॰ अग्नयदृदं॥ होतरि प्रविष्टे॥ अग्नीदपस्त्रिः संमृष्टि॥ सपरिषोजनी
यदर्पान्स्येयनोपसंगृह्यापस्त्रिः संमार्ष्टि॥ आपो वजुजितो वजं वु आपः सरिष्यंतीर्वजं
जेष्यंतीर्वाजिनीर्वा जजितो वा जजित्या ऐसंमार्ज्मि पो अंनादा अन्नाद्याय॥ अपां प
श्चात्कश्चित्तिष्ठन् अज्यस्थालीनिष्कासं चादत्ते॥ अध्वर्युस्तदुदङ्तिष्ठन्नेव वेदमुपभृ
तं स्रुवाजुहोमि शुक्रं ते ति चतुर्गृहीतं गृह्णाति॥ य॰ तिष्ठन्नेव पुरोनो ते ति प्रकृतिवदनुमंत्रयते॥

अध्वर्युरप्राक्रम्य प्रकृतिवन्नीन्प्रयाजान्यजति॥ तथैवानुमंत्रणं॥ अध्व॰ प्रप्राक्रम्य ज्योतिस्त्वे
ति चतुर्गृहीतं गृह्णाति॥ चुरोस्त्वेत्यादि बुद्धोस्त्वेत्यंतं यज॰॥ अ॰ अप्राक्रम्य पंचमामिष्ट्वा यजमा
नेन प्रकृतिवदनुमंत्रिते प्रप्राक्रम्य प्रयाजशेषेणाज्यस्थालीनिष्कासं चाभिघार्य पुनराज्यस्था
लीमभिघारयति॥ अर्चिस्त्वेति जुह्वामुपस्तीर्य यजमानेन भूरसाकमिति युक्ते अग्नये नुब्रू
हीति युक्त्वा पुनरर्चिस्त्वेति त्रिर्गृह्णाति॥ य॰ हविर्देवानामित्यादि त्रिभिरनुमंत्रयते॥ अ॰ अप्रा
क्रम्याश्वा॰ अग्निं यजेति॥ एवमेव सोममिष्ट्वा सर्वप्रायश्चित्तं हुत्वा॥ अर्चिस्त्वेति जुह्वामुप
स्तीर्य भूरसाकमिति युक्ते निष्कासादवघनूवरुणायानुब्रूहीति युक्त्वा द्विरवदायार्चिस्त्वेत्यभिघा
रयति॥ हविर्देवानामिति यजमानः॥ अ॰ अप्राक्रम्य वरुणं यजेत्यादि॥ य॰ वरुणायेदं॥ वरुणस्या
हं देवयज्ययाधर्मभाग्भूयासं॥ प्रयोजनाभावान्नस्रुवाहुतिः॥ पुनरर्चिस्त्वेत्युपस्तरणाति॥ य॰ भूर

स्माकैमित्युक्ते। अग्नीवरुणाभ्यामनुब्रूहीत्युक्तासर्वैर्निष्कासंसन्नदवदायद्धिर भिघारयत्य
र्चिस्त्वेति॥य॰ हृदिदेवानां॥आज्ञिषोयजमानस्य॥यागांतेअग्नीवरुणाभ्यामिदं॰॥अग्नीव
रुणयोरहंदेव॰ युज्ययायुष्मान्॰॥अध्वर्युःपरिधिस्थलमुद्धृत्यप्रसृतिवत्संक्षालनंनि
नयति॥अथाह॥ब्रह्मन्नस्थास्यामोग्रीदपःसकृत्संमृद्गीति॥ब्रह्मा प्रसृतिवत्प्रसोति॥अग्नी
त्स्यबंधनदर्भैरपःसंमार्ष्टि॥आपोवाजजितोवाजैवआपःसस्रुषीर्वाजैजिग्युषीर्वाजिनीर्वाज
जितोवाजजित्यायेसंमार्ज्म्यपोअंनादाअन्नाद्यायाय॥अथज्योतिस्त्वेति चतुर्गृहीतंगृह्णाति॥
सुवीर्यायत्वेत्यादिचतुर्भिर्यजमानोनुमंत्रयते॥अ॰ अत्राक्रम्य॥देवोयज॥यजेत्युत्तरं॥याज
मानंप्रसिद्धं॥प्रत्याक्रम्यापस्रुचंप्रतिष्ठापयति॥समुद्रेहृदयमप्स्वंतः॥स्रुचमद्भिःपात्रं
तरेणापूरयति॥संलोविशंलोषधीरुतापः॥अप्स्वपोजुहोति॥युक्तस्यैतायक्षपतेहविर्भिस्त

क्तवाकेनमोवाकेविधेमस्वाहा॥य॰ यज्ञपतयइदं॥अ॰ निष्कासस्थालीमप्सुक्षिपेत्॥यज
मानोंजलिनापोगृह्णाति॥सुमित्रानआपओषधयःसंतु॥नेर्कृत्यांनिरस्यति॥दुर्मित्रास्त
स्मैभूयासुर्योस्मांद्वेष्टियंचवयंद्विष्मः॥यजमानःसर्वेवाप्सुतुषान्विकिरंति॥यजमानोविंदूनु
पस्पृशति॥होता॥प्रत्यामुंचामीतिपत्न्यायोक्त्रंविमुंचति॥सर्वेस्वंस्वंपात्रमुदकांतेनिदध्युः॥
नमोवरुणायाभिषिक्तोवरुणस्यपाशः॥उपविश्यापःपिबंति॥भक्षस्यावभृथोसि॥गुग्गु
लीवृक्षनिष्ठीवंति॥शुध्यर्थमाचम्यपुनःपिबंति॥भक्षितस्यावभृथोसि॥प्रोथ्यगिलंति॥
शुध्यर्थमाचम्यपुनर्गृहीत्वागिलंति॥भक्षंभृतस्यावभृथोसि॥द्विराचम्यस्रांति॥आपोअ
स्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु॥विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यःशुचिरा
पूतएमि॥इदमापःप्रवहतयत्किंचदुरितंमयि॥यद्वाहमभिदुद्रोहयद्वाशेपउतानृतं॥सुमि

न्यान्न्आपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मः॥पत्नीयजमानाव
न्योन्यस्यपृष्ठेधावतः॥अमज्जनःस्नातः॥नवेवाससीपरिधायपूर्वेददतः॥सर्वेजलादुत्ती
र्यादित्यमुपतिष्ठंते।उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं॥देवंदेवत्रासूर्यमगन्मज्योति
रुत्तमं॥वाससीपरिधायदंपतीददतः॥प्रतिप्रस्थातरुन्नोनय॥सैषाहस्तोगृहीतोदानय त
ति॥उद्वयंतमसस्परिपश्यंतोज्योतिरुत्तरं॥देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं॥उदुत्यं॰सू
र्यं॥चित्रंदेवानां॰तच्छुक्रमुच्चरंतिसप्तभिः।यजमानउत्तरन्नग्रपदेनापस्तीरंप्रतिप्रेरयति॥
प्रतियुतोवरुणस्यपाशः प्रत्यस्तोवरुणस्यपाशः॥यजमानोप्युत्तीर्यब्रूयात्॥उद्वयंतमसस्प
रिज्योतिष्पश्यंतउत्तरं॥देवंदेव॰ रुत्तमं॥सर्वेतीर्थमनवेक्षमाणाःपरस्परमस्पर्शंतोदेवय
जनंप्रत्याव्रजंतःप्रसेकृतिस्रस्तिस्रःसमिधोगृह्णंति॥अग्नेःसमिदसितेजोसितेजोमेदेहि॥

इतिप्रथमां॥ एधोस्यधिषीमहि॥इतिद्वितीयां॥ समिदसिसमेधिषीमहि॥इतितृती
यां॥एवंक्रमेणगृहीत्वाप्रेत्यैतराहवनीयस्यप्रत्यगुदङ्गच्छिलातमुपतिष्ठंते॥आपोअ
द्यान्वचारिषंरसेनसमगस्महि॥ पयस्वानग्न्आगहितंमासंसृजवर्चसा॥सर्वेषामुप
स्थानेसमाप्तेयोयःपूर्वंगृह्णीयात्सस्पूर्वमादध्यात्॥अग्नेःसमिदसितेजोसितेजोमेदाः
स्वाहा॥सोमस्यसमिदसिदुरिष्टेर्मापाहिस्वाहा॥पितॄणांसमिदसिमृत्योर्मापाहिस्वाहा॥
सर्वत्राग्नयइदं॥पत्न्यास्तूष्णीग्रहणहोमौ॥सर्वेसंस्थाजपेनोपतिष्ठंते॥ततोयजमानः
पयस्वतीरित्याद्युक्त्वाव्रतविसर्गंतंकुर्यात्॥ततउत्तराग्निसमारोपणपूर्णाहुतीकु
र्यान्नवा॥पक्षेऽध्वर्युर्यजमानाचारब्धश्चोत्तरवेदिकुमग्निंशकलेसमारोपयति॥अयं
तेयोनिर्ऋत्वियोयतोजातोअरोचथाः॥तंजानन्नग्न्आरोहाथानोवर्धयरयिमिति॥

तच्छकलंशालमुखीयेप्यादधाति॥ आजुह्वानःसुप्रतीकःपुरस्तादग्नेस्त्वंयोनि
मासीदसाध्या॥ अस्मिन्सधस्थेअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥ उद्बुध्य
स्वाग्नेप्रतिजागृह्येनमिष्टापूर्तेसꣳसृजेथामयंच॥ पुनःसूनवःस्वापितरंयुवानमुन्वा
तꣳसीत्वयितंतुमेतं॥ मध्यमाग्निमुपसमाधायापूर्वाज्येनचतुर्गृहीतेनस्रुचंपूरयित्वा
कांचित्समिधमाधायपरिषिच्यजुहोति॥ सप्तते अग्नेसमिधःसप्तजिह्वाःसप्तर्षयः
सप्तधामप्रियाणि॥ सप्तहोत्राःसप्तधात्वायजंतिसप्तयोनीरापृणस्वाघृतेनस्वाहा॥
अग्नयेसप्तवतइदं॥ वरमध्वर्यवेददाति॥ धेनुमनड्वाहंवा॥ पुनरालंभजपादिब्राह्मण
तर्पणांतेनिवर्तनादिवैश्वदेववन्मंत्रेविशेषः॥ य हुर्यःपूर्यवर्तयत्॥ अंतोन्यथिव्या
दिवः॥ अग्निरीशोनआजसा॥ वरुणोधीतिभिःसहा॥ इंद्रोमरुद्भिःसखिभिःसह॥

अग्निस्तिग्मेनेत्यादिसमानं॥ निवर्तनेनोपवाप्यश्मश्रूण्येववापयीतनकेशानिति
शाल्लिकिः॥ निवर्तनेनोपवाप्यनैवश्मश्रूणिवापयीतनकेशानिस्योपमन्यवइतिद्वै
धे॥ मध्यमयोःपर्वणोर्यद्यपिकेशवापनंनक्रियतेतथापिश्मश्रुवापनंकर्तव्यमिति
सिद्धांतभाष्ये॥ नोभयवापनंमध्यमयोरितिवृत्तिस्तद्देवत्रातो॥ अन्तेपरिवत्सरीणाꣳ
स्वस्तिमाशास्तेइतिवृद्धेत्॥ ॥संतिष्ठतेवरुणप्रघासपर्व॥ ॥अथसाकमेधपर्व॥
॥तस्याद्येष्टिर्यथोक्ताप्रधानयागोभवतितथाकार्या॥ अपरात्रेग्नीन्विहृत्याग्निहो
त्रमपहृत्यहुत्वापाःपुरस्तादित्यादिसाकमेधहविर्भिर्यक्ष्ये॥ श्रौतथे संते॥ पुनर्याः
पुरस्तादित्यादिअनीकवद्धविषायक्ष्ये॥ अनीकवत्संबंधिहविः॥ व्रीहिमयःपुः अग्नि
रनीकवान्प्रधानदेवता॥ अग्निःस्विष्टकृदित्यादि॥ अग्निविहरणान्वाधानादि॥ पंच

दशसामिधेन्यः। अग्नयेनीकवतेजुष्टं निर्वपामि॥ एवं प्रोक्षणादि॥ अष्टौकपालांनिर्वाप्य घृताज्यभागौ॥ अग्नेरनीकवतोहं॰ अन्वादः। अन्वाहार्यमासाघृतिस्त्रागादद्दाति॥ अग्नेरनीकवतोहमुज्झितमनूज्झेषं॥ समम्यस्तंतिष्ठतेब्राह्मणातर्पणांतेष्टिः॥ ॥ ॥ मध्यंदिनेयथाप्रधानयागोभवतितथासांतपनेष्टिः कार्या॥ तस्यांयाः पुरस्तादित्यादि मारुत्सांतपनेनहविषायक्ष्ये॥ मारुत्सांतपनसंबंधिहविः। व्रीहिमयश्चरुः। मरुतः सांतपनाः प्रधानदेवता। अग्निः स्विष्टकृदित्यादि॥ पंचदशसामिधेन्यः। कपालपिष्टोद्वपनीमदंतीदृषदुपलशम्यावर्जयित्वा चरुस्थालीमेक्षणाभ्यांसहपात्राण्यासादयेत्॥ मरुद्भ्यः सांतपनेभ्योजुष्टं निर्वपामि॥ चरुधर्माः प्रसिद्धाः। वृधन्वंतावाज्यभागौ। मरुताꣳसांतपनानामहं॰ प्राणो ऋध्यासं॥ अन्वाहार्यमासाघृतिस्त्रागादद्दाति। मरुताꣳसांतपनानामहमुज्झितमनूज्झेषं। समम्यस्तंतिष्ठतेब्राह्मणातर्पणांतेष्टिः॥ ॥ अथगृहमेधीयेष्टिप्रयोगः॥ ॥ अपराह्णेयजमानः याः पुरस्तादित्यादिगृहमेधीयहविषायक्ष्ये॥ श्रांतथेयंते। गृहमेधीयहविः। व्रीहिमयश्चरुः। अग्नीषोमावाज्यभागौ॥ मरुतोगृहमेधिनः प्रधानदेवता। अग्निः स्विष्टकृत्। एवमासकेनेत्यादियक्ष्यइसंतेतूंछीदर्भैर्वत्सानपाकृत्याग्निहोत्रार्थं अग्नीन्विहृत्य कांचिद्दुग्धानस्यसाग्निहोत्रंहुत्वाग्निद्वयंत्यक्त्वापुनरिष्ट्यर्थमग्नीन्विहृत्यान्वाधानादिव्रतांते। अध्वर्युः। देवस्यत्वेत्यसिदमादाय प्रसुष्टुमिसमिमंत्रनिष्पन्नतूंछीपरिषोजनीयांवेदंचरुत्वाकर्मणेवामिनिपाणीसंमृश्यपरिस्तीर्यगार्हपत्यस्यपुरस्तात्स्थंचरुस्थालीमेक्षणमग्निहोत्रहवणीप्रोक्षणीशूर्पंकृष्णाजिनमुलूखलंमुसलंजुहूमुपभृतंध्रुवांमिडापात्रंप्रणीताप्रणयनमाज्यस्थाल्यौवेदंदारुपात्रीयोक्त्रंवेदपरिवासनंधिष्ण्यमन्वाहार्यस्थालीमितिपात्राण्यासादयति॥ मंत्रे

णब्रह्मणामुपदेशयज्ञस्येतिष्टयाः स्तीर्त्वाः मंत्रकेसमंत्रकेचपवित्रेकृत्वाः मंत्रकंपवि
त्रापयामपः पयोवाप्रणयति। ब्रह्मन्नपः पयोवाप्रणेष्यामीतियजमानवाचंयच्छेत्सुक्ष्मा
श्रुनुयापुः पयोवाप्रणीयानीति। वेषायत्वेसमिहोत्रहवणीमादायप्रस्तुष्टमितिनिष्टप्य
तूष्णीदारुपात्रीस्पृष्ट्वाव्रीहीन्प्रेक्ष्यकरणादिनिरस्यापः स्पृष्ट्वाः मंत्रकपवित्रव ताप्रोक्ष
णीपात्रेणचतुरोमुष्टीन्व्रीहीणांनिर्वपतिदेवस्यत्वा॰ मुरुद्भ्योगृहमेधिभ्योजुष्टंनिर्वपा
मीतित्रिर्यजुषातूष्णीचतुर्थं। अमंत्रकप्रोक्षणीः संस्कृत्यसमंत्रकाश्चस्रुचि। आपोदे
वीरित्यादिप्रोक्षितास्छेयंते। तूष्णीप्रोक्षणीभिर्हविःप्रधान पात्राणिचतूष्णीप्रोक्षेत्
नवताः परिशोषयेत्तत्पवित्रेरक्षेत्। ततःसमंत्रकाभिः शुंधध्वमित्यंगपात्राणिप्रोक्षेत्
ततस्तूष्णीमजिनावधूननादिप्रक्षालननिनयनांतंकृत्वाकस्त्वातेसर्वावसिष्टास्तूष्णी
दोहयित्वाचरुस्छाल्यांतिरःपवित्रंतदपोवानीयसोम्यवदधिश्रयणादीतिकेशवः। तूष्णी

गार्हपत्येधिश्रित्यश्रपयेदित्यन्ये। जघनेनगार्हपत्यंतूष्णीतिरःपवित्रमाज्यंनिरूप्यगार्हप
त्येधिश्रित्यचरुणासहतूष्णीपर्यग्निकृत्वाऽन्यस्छाल्यांमंत्रेणाज्यंनिरूप्या धिश्रित्यमं
त्रेणपर्यग्निकृत्वावेदादानादिसमंत्रकंकुर्यात्। प्रोक्षणीरासादयस्रुवंचस्रुचश्चसंमृज्ज्यप
त्नीःसंनह्याज्येनोदेहि। अग्नी स्राशित्रवर्जंपात्राणिसंमृज्यपत्नीःसंनह्यपत्नीतूष्णीम
वेक्षितंमंत्रेणावेक्षितमाज्यंचसहेवनयेत्॥ गार्हपत्याहवनीयपोर्निधानमाज्यमसीसवेक्ष
णमुत्पवनंचअप्रधानाज्यस्य। अर्चिस्त्वेतिध्रुवायांमंत्रवत्संस्कृतमाज्यंगृह्णातियज॰॥
भूरस्माकमित्यादि। अध्वर्युः। आपोदेवीरित्यादि प्रोक्षितास्छेयंतंकृत्वावेदिरसीतिवेदिं
प्रोक्ष्यस्रुधापिस्पृष्ट्युइतिशेषंनिनीयतूष्णीपरिषिंचनीयदर्भैरेववेदिंस्तीर्त्वाविधृतीनि
शोयंत्रेस्छेइतिसादयित्वातूष्णीजुहूपभृतौसादयति॥ मंत्रेणध्रुवामासाद्यतामग्निम
ग्नातिएषा सदस्सुकृतस्यलोकेतांविलो॰नियं॥ मंत्रवत्संस्कृतोज्यस्छाल्यांबर्हिष्यासा

यतदाज्यं ध्रौवाज्यं चाभिमंत्रयते॥ विष्णु नी स्थो वैष्णवे धामनी स्थः प्राजापत्ये॥ स्थाल्यौ
स्रुवं पात्रीं चादाय गार्हपत्यस्य पश्चात्स्थित्वा मंत्रकाज्येन तूष्णीं चरुमभिघार्योदंच
मुद्वास्य पात्रीं निर्णिज्य तूष्णीमुपस्तीर्य तस्यां चरुमवालयन्नुद्धृत्य स्थाल्यां क्षामकाषम
वशेषयित्वा युद्धृतस्य मध्ये गर्तं कृत्वा प्रभृतमाज्यमानीय संस्कृताज्यपूर्णं स्रुवमादाय
तूष्णीं वेद्यां चरुमासाद्य स्रुवं मंत्रेणासादयति॥ यजमानेन ध्रुवा संस्कृताज्ययोर्यन्मे अग्र
इत्यभिमर्शने कृते होतरहीत्याह॥ नवेदे नोपवीजनं प्रयोजनाभावादिति रामाडारः॥ अग्नी
दग्निः संमृष्टि आ॰। अग्नेर्वज्रजिदित्यादिना त्रिरग्निं संमार्ष्टि॥ अध्वर्युर्ध्रौवाज्यात्
प्रभृति वदृयिमंतावाज्यभागौ हुत्वा संस्कृताज्येन प्रायश्चित्तं हुत्वा। असंस्कृताज्येन जु
हुयामुपस्तीर्य उच्चैरुपांशु वा मरुद्भ्यो गृहमेधिभ्यो नुब्रूहीत्युक्त्वोपस्थानाभिमर्शनव

र्ज्यं पूर्वार्धापरार्धाभ्यां चरोरवदाय तूष्णीं तेनैवाज्येनाभिघार्य प्रत्यभिघार्य चात्याकृम्या
श्राव्याह प्रत्याश्रावितेमरुतो गृहमेधिनो यजेत्यादि॥ प॰ मरुद्भ्यो गृहमेधिभ्य इदं। मरु
तां गृहमेधिनां मुहं॰ प्राणे ऋध्यासं॥ स्विष्टकृदुपस्तरणादौ संस्कृताज्यमिडायां च॥ अंतः
परिध्यपानिनयनादि मार्जनांतं प्रकृतिवत्॥ प्राशित्रयजमानभागचतुर्धाकरणानि
नसंति। अन्वाहार्यमासाद्य चतस्रो भागा ददाति॥ ततो योक्त्रमिमोकादि संस्थाजपांतं हो
तुः पत्नीव्रतविसर्गांतं कृत्वा निष्क्रामेत्॥ ततोध्वर्युर्ध्रुवा प्यायनप्रायश्चित्तसमिष्टय
जुः प्रणीतानिनयनांतं कुर्यात्॥ संस्थाजपांतं ब्रह्मापि। यजमानः कृत्वा ते पयस्वतीरि
त्यादि व्रतविमोकं कृत्वा आत्मानं संप्रेष्यति। आस्मृणाः स्तर्पयि तुवाइति॥ ॥संतिष्ठ
ते गृहमेधीयेष्टिः॥ ॥अथ यजमानः क्षामकाषं परिशिष्य गृहमेधीयं प्राश्नीयात्॥

५ मार्जनांते

अस्यामेवरात्रौदक्षिणाग्नौवह्नौदनंपक्त्वायजमानस्यपत्नीकुमारादयः प्राश्नीयुः॥सर्वेअं
जनाभ्यंजनयोःस्पर्शनमवेक्षणंवाकुर्युः॥ततोपररात्रेग्रीन्विहृत्यपयसाग्निहोत्रंहुत्वागार्हपत्यं
परिस्तीर्योत्तरतस्तूष्णीषुसादयति॥वेदंकृत्वेदवेदिप्रोक्षणीस्रुवमाज्यस्थालीसंमार्गार्थान्
दर्भानिति॥पवित्रेकृत्वाप्रोक्षणीःसंस्कृत्यतूष्णीपात्राणिप्रोक्ष्याज्यंसंस्कृत्यदर्वेस्रुवौनिष्ट
प्यसंमृज्यदर्व्यामुपस्तीर्यक्षामकाषमवदायद्विरभिघार्यगार्हपत्येसमिधमाधाययजमा
नाचारब्धस्तिष्ठन्नासीनोवाजुहोति॥पूर्णादर्विपरापतसुपूर्णापुनरापत॥वसुनेवविक्रीणा
वहाइषमूर्जंशतक्रतोदेहिमेददामितेनिमेधहिनिनेदधे॥निहारमिन्निमेहरानिहारं
निहरामितेस्वाहा॥ब्रह्मणा व्याहृतिपूर्वाञ्चारितहिंकारेणसमकालंस्वाहाकारोयथा
प्रयतितथायजमानाचारब्धोजुहुयात्॥इंद्रायेदं॰गार्हपत्येपरिषिच्य॥ऋषभंददाति॥

अध्वर्योयंतेऋषभस्तंप्रतिगृह्णीष्व॥अ॰देवस्य॰सुद्रायुगामिति प्रतिगृह्णीयात्॥ ॥अ
थक्रीडिनीयाः॥ ॥यथासूर्योदयेयागोक्तवर्तितथाकार्या॥याःपुरस्तादिस्यादिक्रीडिनीयहवि
षायक्ष्ये॥श्रोतथेत्यंते॥क्रीडिनीयहविः॥व्रीहिमयःपुरोडाशः॥पंचप्रयाजाः॥अग्नीषोमा
वाज्यभागौ॥मरुतःक्रीडिनःप्रधानदेवता॥अग्निःस्विष्टकृदित्यादि॥विहृत्यान्वाधानादि॥
पंचदशसामिधेन्यः॥पाणिसंमर्शनादि॥मरुद्भ्यःक्रीडिभ्योजुष्टंनिर्वपामि॥एवंप्रोक्षणादि
सप्तकपालान्युपधाय॥वार्त्रघ्नावाज्यभागौ॥आज्यभागौतेमरुद्भ्यःक्रीडिभ्योनुब्रू
हीत्यादि॥मरुद्भ्यःक्रीडिभ्यइदं॥मरुतांक्रीडिनामहं॰वृत्रहाभूयासं॥अन्वाहार्यमासा
द्यतिस्रोगादद्याति॥मरुतांक्रीडिनामहमुज्जितिमनूज्जेषं॥सममन्यत्॥ ॥संतिष्ठतेब्रा
ह्मणतर्पणांतेष्टिः॥ ॥अथतदानीमेवयाःपुरस्तादित्यादिमहाहविर्निर्वपेयक्ष्ये॥महाहविःसं
बंधिहविः॥व्रीहिमयःपुरोडाशः॥व्रीहिमयश्चरुः॥नवप्रयाजाः॥अग्नीषोमावाज्यभागौ॥अ

ग्निः सोमः सविता सरस्वती पूषा इंद्राग्नी इंद्रो विश्वकर्मेति प्रधानदेवताः॥ अग्निः स्विष्टकृत्
नवानुयाजाः॥ सद्योयक्ष्यइत्यंते विहृत्याधानादि समाप्तदर्शसामिधेन्यः॥ पंचविधं ब
र्हिः॥ औत्तरवेदिकान्संभारान्संभरति॥ कपालानि ३२ स्थाली: ४ तावंति मेक्षणानि। कंसो
पवेषवर्ज्यं सर्वं वैश्वदेववत्॥ यथादेवतं निरुप्य प्रोक्ष्य चरुं न्वभिघार्य अग्निसवितृपूषे
द्राग्नीविश्वकर्मभ्योधिवपनं॥ ऐंद्राग्नकपालोपधानं वरुणप्रघासवत्॥ ततऐंद्रचरवे
स्थालीविश्वकर्मणएककपालमुपदधाति॥ अग्नीदितस्त्रिर्हरेत्यंते। याचतिस्फ्यमुदपा
त्रं बर्हिरित्यादि उत्तरपरिग्राहांतं वरुणप्रघासवत्॥ प्रतिप्रस्थातुरभावान्नोहः। प्रे
षकंसवर्जं एषदाज्यग्रहणपुरोडाशोद्वासनांतं वैश्वदेववत्॥ मंथनं च॥ आज्यभागांते
ऐंद्राग्नांतं वरुणप्रघासवत्। ततइंद्रायानुब्रूहीत्यादि॥ यज० इंद्रायेदं० इंद्रस्याहं देवयुज्य

यैंद्रियावीर्यपासं॥ उपांशु विश्वकर्मयागांते। य० विश्वकर्मणइदं। विश्वकर्मणेदं० विश्वा
निकुर्मोएयवरुंधीय। अध्वर्युः उपहोम पक्षेसहस्रसहस्रस्यश्रुतपश्रतपुस्यश्रेतिजु होति। अ
न्वाहार्यमासाद्य ५ गादद्याति॥ समिष्टयजुर्होमांतं वैश्वदेववत्॥ वाजिनवर्ज्यं। नव्रतविसर्गः।
समाप्तोपादिवरदानांतं वरुणप्रघासवत्। आपर्वसमाप्तेस्त्रयएवाग्नयः। न विहरलोप॥ संति
ष्ठतेमहाहविः॥ अथमहापितृयज्ञः॥ तंकरिष्यन्नुपकल्पयते। व्रीहींश्चयवांश्चाष्टौ क
पालानि॥ अर्धपात्रप्रमाणं मृतवत्सायाः पयः॥ नवपात्रीणि पंचभर्जनार्थं कपालं। इक्षुशाला
कां। त्रीन्पलाशपर्णत्रयसहितान्दंतान्। समूलं निर्मूलं वा बर्हिः। तिर्यगूर्ध्वप्रमाणेन प्रावृता
दधिकमिध्मं। परिश्रयणं वासः कृत्रिपूपबर्हणे अंजनाभ्यंजने दशामाच्छादनं वासः। अपू
र्वं स्फ्यमुदकुंभो योक्त्रवर्जं शूर्पद्वययुता निस्फ्यादीनि॥ अथपेतृकविहारः॥ चतुःस्त्र
क्तिर्भवेद्वेदिर्दक्षिणाहवनीयतः॥ अथवा दक्षिणाग्नेः स्यात्सा च दक्षिणपूर्वतइतिगोपा

लः॥ वेदिस्तु दक्षिणाग्नेः स्याद्दक्षिणापूर्वकस्य वेति कल्पः। दक्षिणाग्नेः पुरस्तात्संचरमंव
शिष्यपुरुषमात्रां वेदिं करोतीति तैत्तिरीयकं॥ ततश्च दक्षिणाग्नेर्दक्षिणतः पुरस्ताद्वा मध्य
शंकोरंजसा पदमात्रं यथावकाशं वासं चरंत्यल्पा तत्पुरस्तात्स्थाने चतुरंगुलाधिकसा
र्धपंचारत्नी शंकुः। अष्टारत्निमितरज्जुमध्ये लक्षणं कृत्वा शंकोः पार्श्वे प्रतिमुच्य लक्ष
णेन दक्षिणतउत्तरतश्चारुष्य शंकूनिहन्यात्॥ ॥ सापेत्कीवेदिः॥ ॥ यजमानमात्रा
समचतुरस्रादिक्षु यथास्त्रक्तयोभवति तथा वेदिः कार्या॥ तन्मध्ये चाहार्यपचनं प्रणापे
दिति॥ अंगप्रधानार्थेषु मंत्रेषु देवशब्दादुपरि पितृशब्दः प्रयोक्तव्यः॥ केवलांगार्थे
षु देवशब्दः॥ केवलप्रधानार्थेषु पितृशब्दएव॥ यजमानस्य ऋत्विजां चदेवमानु
षवानामनग्रास्यं॥ यावदुक्तं प्राचीनावीतं। अन्यत्र यज्ञोपवीतं॥ आदितएव प्राची

नावीतमाप्रा नापत्यादितिवा॥ याः पुरस्तादित्यादि प्राचीनावीती महापितृयज्ञहविर्भिर्य
क्ष्ये॥ ओं तथेसंते॥ महापितृयज्ञसंबंधिहविः॥ व्रीहिमयः पुरोडाशः। यवमय्याघारनाः। य
वमयः करंभः॥ अपबर्हिषश्चत्वारः प्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ सोमः पितृमा
न्पितरो बर्हिषदः पितरोग्निष्वात्ताः यमइति प्रधानदेवताः॥ अग्निः कव्यवाहनः त्रिष्टुभ
इत्यर्थे। अपबर्हिषो द्वावनूयाजौ। सूक्तवाकशंयुवाकौ। न पत्नीसंयाजाः। सद्योयक्ष्यइत्यंते।
गार्हपत्यमन्वादधाति॥ ममाग्ने॰ येजेमुस्वाहा॥ ममदेवाः पितरोहि हवे॰ अस्मिन्स्वाहा॥
मयिदेवाः पितरोद्रविणमायजंतां॰ हूतिः॥ देव्याः पित्र्याहोतारा॰ तनुवासुवीरास्वाहा॥
अथान्वाहार्यपचनं॥ मह्यंयजंतित्यादिना चाधायपुनस्तमेवान्वादधाति॥ धाताधात्रे
णां॰ देवाः पितरः पांतु न्यूर्थात्स्वाहा॥ पुरुष्यचोनो॰ दाः स्वाहा॥ येनः सपत्ना अप

॰ मेक्रुन्स्वाहा॥ दक्षिणाग्नेरुत्तरतस्तिष्ठन्। अग्रवीचुमिं द्र॰ मेदिनं वेसुपतिष्ठते॥ नव्रतां
अध्वर्युः। इडाजपादिप्राचीनावीतीदेवस्येत्यभिमाशया युक्तस्य घोषदसीत्यादिदेवेभ्यः
पितृभ्यो जुष्टं देवानां पितृणां परिषूतमसि॥ देवपितृ बर्हिर्मोत्वान्वकू॰॥ देवपितृ बर्हिः
शृतवल्लोविरोह॥ देवं पितृनाममसि॥ ततस्त्वामष्टधासंभरामि॰॥ कर्मणेवां देवेभ्यः पि
तृभ्यः शकेयं। आग्नेयादिदक्षिणाग्निमथगार्हपत्यपरिस्तृणाति॥ गार्हपत्योत्तरतस्तृणे
द्वेकेकशः पात्राणि सादयति॥ कृत्रिपूपबर्हणे अंजनाभ्यंजनेदशाः स्फ्यमुदकुंभोपणे
रंतानि परिश्रयणं॥ स्फ्यंकपालैः सह द्वेनवेपात्रे भर्जनकपालं समेक्षणं दृक्षुशला
कांचाग्निहोत्रहवणीं द्वे शूर्पे दारुपात्र्यासहत्रीणि पात्राणि योक्त्रवर्जमन्यानि च॥ तत्रा
ज्यस्थाल्यासहा पूर्वाज्यस्थाली च। दक्षिणाग्नेर्दक्षिणतो ब्रह्मा तूष्णीं निरसनोपवेशने ३७

कुर्यान्न ब्रह्मजपं॥ तत्रस्थ एव यजमानस्तं स्तृणीते॥ ऋ पतेत्॰ ऋतस्य पतेत्वा स्तृणीम
हे॰ दिवमिति॥ गार्हपत्यादादक्षिणं स्तृणन्नुत्तीर्त्वापः प्रणयति॥ अपः प्रणेष्यामि वाचं
यच्छेति॥ ब्रह्मणा जपवर्जितं ओं प्रणयेत्युक्ते दक्षिणाग्नेरुत्तरतस्ताः प्रणयति॥ वेषाय
त्वेत्यग्निहोत्रहवणीं शूर्पे चादाय प्रस्तुष्टमिति निष्टप्योत्तरेण गार्हपत्यं निहितदारुपात्र्यां
व्रीहीन्यवांश्चासंस्पृष्टान्प्रक्षिप्याभिमृशति॥ धूरसि॰ धूर्वमुस्त्वं पितृणामसि॰ वह्नितं
मं पितृहूतमं॰ हूः॥ मित्रस्य वां चक्षुषा प्रेक्षे मा भेष्टं मा संविक्षाथां मा वा॰ हिंसिष्टं॥
उरुणी वातोय॥ हविर्निर्वपामि॥ व्रीहीणां चतुरो मुष्टीन्निर्वपति। देवस्य त्वा॰ क्ष्या॰ सोमा
य पितृमते जुष्टं निर्वपामि॥ य॰। अग्निदूतं॰ हवे पितृन्यज्ञियान्॰ महे॥ आयंतु पि
तरः सुमनस्यमाना विश्वं तु पितरो हविषो मे अस्य॥ अ॰। यवानां चतुरो मुष्टीन्निर्वपति॥

देवेभ्यः पितृभ्यो बर्हिषद्भ्यो जुष्टं पुनर्यवानामेव ॥ देवेभ्यः पितृभ्यो ग्निष्वात्तेभ्यो ग्रा
पुनर्व्रीहीणां युमायजुष्टं निर्वपामि ॥ यज॰ पूर्ववदनुमंत्रयते ॥ अध्वर्युः इमे पितृणां
इमे उनः सुहा स्फात्यै बृंनारोत्यै पूर्वं तरिक्षमन्वितं ॥ अदित्या वामुपस्थे सादयामि ॥
अग्नेर्हव्यं रक्षस्वा ततः प्रोक्षणीः संस्कृत्य यथादेवतं व्रीहीन्यवांश्च भेदेन प्रोक्षति ॥
पाचाणि च ॥ शुंधध्वं दैव्याय कर्मणे देवपितृयज्यायै ॥ अवघातकाले ॥ अग्ने
स्तनू॰ विसर्जनं पितृवीतये त्वा गृह्णामि ॥ अद्भिरसि॰ सदृदं पितृभ्यो हव्यं॰ ॥ अत्रैव
हविष्कृतमाहुयति ॥ तंडुलक्षालनांते पुनरवधूतमित्यादि यवानावपति ॥ अग्नेस्तनू॰
पितृवीतये त्वा॰ अद्भिरसि॰ इदं पितृभ्यो हव्यं॰ यवक्षालनांते क्षालनोदकं तंत्रेणानि
नयेत् ॥ अधिवपने ॥ देवेभ्यः सोमाय पितृमते जुष्टमधिवपामि युमायजुष्टमधिव

पामि धान्यमसि धिनुहि पितृन्धिनुहि ॥ धृष्टिरसीति धृष्टिमादाय गार्हपत्याद्दक्षिण
तः अपितृयज्ञं वहेत्यंगारं निधाय षट्कपालान्युपदधाति ॥ ध्रुवमसि॰ सजातानस्मे पर्यू
ह ॥ तत्र मध्ये त्रीणि दक्षिणतो द्वयमुत्तरतो महदेकमिति विभागः ॥ तदुत्तरत अपितृयज्ञं
वहेत्यंगारं निधाय ध्रुवमसि॰ नस्मे पर्यूह ॥ भर्जनार्थकपालमुपधायतस्मिन्यवान्प्र
क्षिपति ॥ घर्मास्त्वा विश्वायुषः ॥ यवान्भर्जयित्वा तूष्णीं वितुषीकृत्य द्वेधा विभज्यार्द्धं पितृ
भ्यो बर्हिषद्भ्यः ॥ अर्धं पितृभ्यो ग्निष्वात्तेभ्यः ॥ ततः कृष्णाजिनास्तिष्ठन्निपात्रांतरे कृत्वा ॥
अवधूननादि । देवस्य॰ भ्यां पितृभ्यो ग्निष्वात्तेभ्यो जुष्टमधिवपामीत्यधिवपति ॥ स
कृन्पात्रांतरेन्युप्य पूर्ववत्तिष्ठन्कृष्णाजिने कृत्वा भर्जनकपालादुदगंतरालं मु
क्त्वादिकपालमुपदध्यात् । तत्र भर्गूणामंगिरसां तपसा तप्येथां । ये घर्मे कपाले

LIBRARY OF THE BOMBAY BRANCH OF THE ASIATIC SOCIETY

उपचिन्वंतिवेधसः॥पूष्णस्तेअपिव्रतईद्रवापूषुंड्ग॥सोमायपितृमतेयमायपिष्टानां
संवपनादिपिंडांतंकृत्वायथादेवतंविभज्यषट्कपालप्रथनांतेकृतेअज्यमपूर्वाज्यंचनिरु
प्यगार्हपत्याद्भस्मभिश्रांगारानपोह्यतेषुनवंमन्मयंपात्रमधिश्रित्यतस्मिंस्त्रिरःपवित्र
मपूर्वाज्यमानीयत्रिरःपवित्रंधानास्त्रिधाश्रोप्यपात्रांतरेमृतवत्सायादुग्धमर्धपा
त्रमानीयतत्रत्रिरःपवित्रंसक्तूनोप्येकयेक्षुशलाकयादक्षिणामुरवोहस्ताभ्यामनार
भ्यपरुवादिनामथ्नाति॥स्थाल्याश्चोर्ध्वलग्नानांविषुषामंतःप्रक्षेपणंकृत्वाहस्ताभ्यां
पिंडीकृत्यपूर्वनिहितनवपात्रोत्तरतोगार्हपत्याद्भस्मभिश्रांगारेषुनवंपात्रंनिधायतत्र
त्रिरःपवित्रंपिंडंनि धायतदुत्तरतःकपालयोःपुरोडाशांनिधायपुरोडाशयोस्त्वचं
ग्राहयित्वाश्रपणांतंकुर्यात्॥अग्रेणजघनेनवागार्हपत्यमाप्येक्ष्योनिनीयपेत्रकाया

३९

६पत्नीकर्मणि॥नेवात्रनचाधिश्रयणंपुनरितिफलं॥

वेदेर्मध्येऽन्वाहार्यपचनादिधंप्रणयेत्॥ब्रह्मादक्षिणतस्तूष्णीनिरसनोपवेशनेकुर्या
त्॥तस्याश्चाद्यजमानः॥अध्वर्युरग्नेःपूर्वार्धात्स्रुवंयजुर्हरति॥अयंवेदः॰सविंदतुलोक
मछिद्रं॰करोतु॥पृथिव्यैवर्मासिवर्मभव॥पृथिविदेवपितृयज्ञ॰शिपं॥अपहतोरक्षःपृथि
व्यै॥व्रजं॰वर्धतु॰॥अपहतो॰देवपितृयजनंन्ये॥अपहतोरक्षःपृथिव्याअदेवपितृयजनः॥
इमांनराः॰यथायंनरिष्यत्॥वेदिंकिंचिदुद्धृत्याह॥इतस्त्रिर्हरति॥उत्तरंपरिग्राहंपरिग्र
हीष्यामि॥ब्रह्माजपवर्ज्यंश्रोपरिगृहाण॥प्रोक्षणीरासादये॰संमृज्याज्येनोदेहि॥नपत्नी
संनहनवतग्रहणाज्यावेक्षणांतं॥अ॰आज्यमवेक्षयते॥अग्नेर्जिह्वासिसुभूर्देवानांपित्र
णांधाम्नेधाम्नेदेवेभ्यःपितृभ्योयजुषेयजुषेभव॥जुह्वांपं चगृहीतंगृह्णाति॥याज
मानंप्रकृतिवत्॥पंचमेचतुर्थस्योभयोरावृत्तिः॥अ॰उपभृतिदक्षाकृत्वागृह्णाति॥ज्यो
तिस्त्वति॥याजमानेचतुर्थोष्टमयोरावृत्तिः॥अ॰अर्चिस्त्वेतिध्रुवायां॰धाम्नेधाम्ने

देवेभ्यः पितृभ्यो यजुषे०॥ भूरसि॥ हविर्देवानां पितॄणां॥ आज्ञिषः॥ देवानां पितॄणां त्वा देवताभ्यः पितृभ्यो गृह्णामि॥ कामाय त्वेति पंचमं॥ अ० काले तूष्णीं प्रस्तरं गृहीत्वा तूष्णीं तत्र पवित्रे निधाय न्यङ्ङ्ङ्

आप्यायतां॰तेजसापितृभ्योग्निष्वात्तेभ्योजुष्टमभिघारयामि॥संतर्पयति।आ
र्द्रः॰गोपाः॥नोपांजनं॥पात्रांतरेस्यानंतइत्युपस्तीर्य॥इदमहं॰तेजसायुमायुजुष्टं॰
शृत॰मक्ष्व॥षड्कपाला न्युद्वास्यधानाकपालोद्वासनं॥यद्धर्मे॰॥द्विकपालोद्वास
ने॥ये घर्मकपालेउपक्षिंचंतिवेधसः॥पूषस्तेअपिब्रुतइंद्रवायूविमुंचतां॥अध्व
र्युर्दारूपात्रासहाग्रेगच्छति॥ततःसधानोन्यः॥ततःसकरंभोन्यः॥ततःसपुरोडा
शोन्यः॥अ॰अग्नेःपश्चाद्दक्षिणतःपुरोडाशंधानाःकरंभंपुरोडाशंचोदगपवर्ग
ध्याहुतिभिःसादयति॥हविषांनयनमग्रेणावनीयं॥वेधादक्षिणतःपरिश्र
यणंनिदधाति॥वेधादक्षिणेसंस्तीर्णेबर्हिषिकुशिपूपबर्हणेअंजनाभ्यंजनेद
शाःस्फ्यं॥उत्तरतश्चोदकुंभौ॥वेधादक्षिणतोब्रह्मयजमानावुपविशतः॥ ४१

अध्वर्यवीधावुत्तरतः॥य॰यन्मेअग्ने॰उपस्थे॥पितृयज्ञहविषामुद्वासनांते॥
स्थाताअसिदमाद्यायेत्यादि।तूष्णीपरिभोजनीयांकूलापाणीसंमृश्यस्फ्यंचक
पालानिचेत्युपलांतानिदृशामेक्षणंचपिष्टोद्वपनींचपेत्रकवेदंचदारुपात्रींचध
ष्टिंचमदंतीचेत्यासाद्यपवित्रेयजमानबाहवंयछेत्युक्त्वावेषायत्वेत्यादि॥देव॰हस्ता
भ्यांहुद्वायांबिकायेजुष्टंनिर्वपामि॥प्रतिपुरुषमेकातिरिक्तंनिर्वपेत्॥एककपा
लवदुपधानं॥आप्यनिनयनांतंसमानं॥पितृयज्ञांतेनभिघारितानुद्वास्य
शरावेप्रक्षिप्यकपालोद्वासनांतंकुर्यात्॥सर्वममंत्रकंवा॥मंत्रवत्पक्षेध्वर्युर्नि
र्वापंकुर्यादन्यदन्यः॥अथाध्वर्युर्होतारमामंत्रयते॥एह्यहि।उत्तरश्रोएयोप्राची
नावीतिनमाग्नेय्यभिमुखंस्थितंहोतारमाह॥अग्नये देवेभ्यःपितृभ्यःसमिध्य

मानायानुब्रूहि॥सर्वमन्त्रमंद्रं॥प्रधानमुपांशु॥होत्राजपवर्जं हिंकर्भुवःस्वरोमिसु
क्तेअध्वर्युःप्रतिप्रणवमेकैकांसमिधमादधाति॥य॰प्रथमसमिद्होमे॥अग्नयइदं॥उ
ष्णोअग्नएधिनिशुष्णोअक्षिदासते॥अग्नेदेवपित्रिडूमन्विडूमंत्रजिह्व॥होतुरा
वेयवरणाक्षावान्नयजमानस्यामर्त्यस्येति॥अध्वर्युर्वेदिमोपवीजयति॥स्रोवाघार
माघारयति॥य॰प्रजापतयइदं॥मनोसि॥अध्वर्युः॥परिधीनाग्निंचत्रिस्त्रिःसंमृष्टि॥
आग्नीध्रःप्रवृतिवत्संमार्ष्टि॥अ॰भुर्वनमसि॥जुहूंदेवपित्रयज्ञायै॥उपभृद्देहि॰देव
पित्रयज्ञायै॥संज्योतिषाज्योतिरंक्ताभित्यंतंवृत्वाउत्करेऊर्ध्वाग्रंस्थंनिहत्याश्रावयप्र
त्याश्रावितआह॥अग्निर्देवोदेवान्पित्रन्यक्षत्सीदइत्येतावदुक्त्वाहोतारमीक्षेत॥बर्हिर्व
र्जंप्रयाजांतंप्रवृतिवत्॥प्रयाजाज्यशेषेणध्रुवांपुरोडाशंधानाःकरंभंपुरोडाशमुपभृत

तमित्यभिघारयेत्॥प्रवृतिज्जीवातुमंतावाज्यभागाविष्ट्वाव्रातपत्यादिप्रायश्चित्तंयज्ञो
पवीत्याहवनीयएवजुहुयात्॥यज्ञोपवीतिनस्तथायजमानं॥अथयजमानःप्रथममग्ने
णाग्निंपरीत्योत्तरतउपविशति॥अध्वर्युस्तद्वाह्यतोग्रेणाग्निंदक्षिणतः॥तद्वाह्यतोब्र
ह्मोत्तरतः॥तद्वाह्यतआग्नीध्रोदक्षिणतः॥अध्वर्युःधानाअग्रेणपुरोडाशंउत्तरतःसा
दयति॥जघनेनधानाःकरंभंनीत्वादक्षिणतःसादयति॥द्विकपालपुरोडाशंधानाकरंभ
योःपश्चान्नीत्वादक्षिणतःसादयति॥जुहूमग्रेणोपभृतमुत्तरतः॥ध्रुवांजघनेनोपभृ
तंदक्षिणतः॥वेदिंपरिश्रयणेनपरिवेष्योत्तरतोद्वारंकृत्वापरिक्रमिणमाह॥अनेनो
दकुंभेनसंततयाधारयात्रिरपसव्यैःपरिषिंचन्पर्येहि॥परिक्रमेप्राचीनावीतीउद
कुंभमादायतथापरिषिच्यउदकुंभंस्थाने स्था पयित्वायज्ञोपवीतीपुनर्वेदिं

त्रिःप्रदक्षिणंपर्येति॥अथाध्वर्युर्जुह्वामुपस्तीर्याह॥सोमायपितृमते॰अनुस्वा३धा॥उप
स्थानाभिमर्शनपूर्वकंपूर्वार्धात्पुरोडाशस्यावदाय॥धानाउपतिष्ठते॥माभैष्टमासंवि
ग्ध्वंमावोहिंसिषुंमावस्तेजोपक्रमीत्॥सुरतमुद्धरतेमनुषिंचतावदानानिवःप्रस्थवे
दास्यामिनमोवोअस्तुमामाहिंसिष्ट॥पूर्वार्धान्मेक्षणेनावद्यति॥पुरोडाशावदु
पस्थानाभिमर्शनेकृत्वापूर्वार्धात्करंभस्यावद्यति॥अभिघार्यक्रमेणप्रसनक्ति॥
धानाप्रत्यंजने॥यदेवदानानिवो॰तद्वआप्यायतांपुनः॥स्रुवाहुतिंहुत्वा॥सव्ये
नात्याक्रम्योत्तरतोदक्षिणामुखस्तिष्ठन्नाश्रावयेत्॥ओ३स्वा३धा३इति॥दक्षिणत
उदङ्मुखस्तिष्ठन्प्रत्याश्रावयेदग्नीध्रः॥अस्तुस्वो३धेति॥अ॰सोमंपितृमंतंस्व
धा॥होत्रास्वाधानमइसुक्रेजुहोति॥एवंसर्वत्र॥य॰सोमायपितृमतइदं॥सोमे

स्यपितृमतोहं॰अन्नादः॥अ॰दक्षिणेनदक्षिणतएत्यस्रुवाहुतिंहुत्वाजुह्वामुपस्ती
र्याह॥पितृभ्योबर्हिषद्भ्यः॰अनुस्वा३धा॥पूर्ववदुपस्थानादिमध्याद्धानापुरोडाशकरं
भाणामवद्यति॥स्रुवाहुत्यंते॥ओस्वा३धा३॥अस्तुस्वा३धा३॥पितृन्बर्हिषदःस्वधा३
पितृभ्योबर्हिषद्भ्यइदं॥अन्नादः॥एवंपितृभ्योग्निष्वात्तेभ्योजुहोति॥तत्रापरार्धा
त्करंभपुरोडाशधानानामवदानमितिविशेषः॥अत्राप्यन्नादः॥प्रत्याक्रम्यजुह्वामु
पस्तीर्याह॥यमायानुस्वा३धा३॥उपस्थानाभिमर्शनांतेपुरोडाशस्यावदायाभिघार्य
प्रत्यभिघार्यस्रुवाहुतिंहुत्वाऽश्राव्यप्रत्याश्रावितेयमंस्वधावषट्कृतेजुहोति॥यमा
यदं॥अत्राप्यन्नादः॥प्रत्याक्रम्यस्रुवाहुतिंहुत्वाजुह्वामुपस्तीर्यपुरोडाशस्यावद्यन्ना
ह॥अग्नयेकव्यवाहनायानुस्वा३धा॥पुरोडाशधानाकरंभपुरोडाशानांदक्षिणार्धा

त्सवृत्सरूदयदायद्विरभिघार्यनप्रत्यंजनंभर्जनमेक्षणमिक्षुशलाकांचादायोदङ्
त्याक्रम्य-श्रोस्वाश्धाश्इत्यादिदक्षिणपूर्वेतिहायपूर्वाहुतीर्जुहोति॥-अग्नयेकव्यवा
हनायेदं०॥-अग्नेःकव्यवाहनस्याहं० आयुष्मान्०॥अ०मेक्षणेक्षुशलाकेअग्नावनु
प्रहरति॥संस्त्रावेणाभिजुहोति।अथदक्षिणतएत्यसंक्षालननिनयनादिस्रुवूसा
दनांतंकरोति॥सर्वेपूर्ववद्विपरिक्रामंति॥विपरिहरंतिहवींषिस्रुचश्च॥प्राशित्र
मवदायदक्षिणार्धादिडामवद्यति॥नचतुर्थीकरणं॥होतुरंगुलिपर्वणीअनक्ति॥
य०सुरूपवर्षु०योरेवपितृया एःपंथास्तेनयज्ञोदेवान्पितृन्यं०मधोनी॥एव
मूहःकेशवादिलिखितोपिचिंत्यइतिगुरवः॥अ ग्नीधेषउक्तंदत्वाइलाप्राणाप्त
क्षंकृत्वानमार्जयंते॥अ ध्वर्युराह॥प्राशित्रंपरिहरेति॥आ०परिहरति॥ब्रह्मा

प्राग्दंडनिधानांतंतूष्णीकृत्वावघ्रायबर्हिष्यनुप्रहृत्यावनिनयनांतंकुर्यात्॥अ
न्वाहार्यादेक्षणादोचतूष्णीकृतेयजमानस्तमेवदद्यात्॥हविरुच्छिष्टाद्वासनांतेयज
मानउदङ्ङ्त्यपुरोडाशादिदारुपात्रांमिश्रयित्वापिंडान्कृत्वादक्षिणाश्रोणिदक्षिणां
सोत्तरांसेषुअपूर्वेणास्मयेनोद्धृत्यावोक्ष्यतत्रपूर्वासादितपालाशवृंतानिन्यस्यंतेषु
पितृतीर्थेनमार्जयति॥मार्जयंतांममपितरोमार्जयंतांममपितामहाः॥मार्जयंतांममे
प्रपितामहाः॥क्रमेणोपस्तीर्णेभिघारितान्पिंडान्ददाति॥एतत्तेततदेवदत्तशर्मन्ये
वुत्तामनु॥इतिदक्षिणश्रोण्यां॥एतत्तेपितामह०मन्वित्यादिदक्षिणेसे॥एतत्ते
प्रपितामह०मन्वित्युत्तरेसे॥उत्तरश्रोण्यांहस्तलेपंनिमार्ष्टि॥एषायुष्माकंमियम
स्माकंमिमांवयंजीवाजीवंतोनुसंचरंतोभूयास्म॥अत्रपितरोयथाभागंमंदध्वमिति

स्कासर्वेगार्हपत्याहवनीययोरुदंचोपनिष्क्रम्यदक्षिणाग्निमुपतिष्ठते॥ अयाविष्ठाजुन
युन्कर्वराणिसहिघ्णिरुरुर्वरायगातुः॥ सप्रत्युदैद्धरुणंमध्वोअग्रुंस्वायत्तनूंतन्वामे
रयत॥ दक्षिणाकृतएवाहवनीयं॥ सुसंदृशंत्वावयंमघवन्वंदिषीमहि॥ प्रनूनंपूर्णवं
धुरःस्तुतोयाहिवशांअनुयोजान्विंद्रतेहरी॥ तत्रस्थएवगार्हपत्यं॥ अग्निंतमैन्येयोव
सुरस्तुयंयंतिधेनवः॥ अस्तमर्वंतआशवोस्तंनित्यासोवाजिनइषंस्तोतृभ्यआभर॥ त
तःपूर्वेणाहवनीयं प्रादक्षिण्येनगार्हपत्यस्यपुरस्तात्स्रुक्योःसमाप्तिर्यथास्यात्तथा
शनैर्गच्छति॥ माप्रगामपथोवयंमायज्ञादिंद्रसोमिनः॥ मांतःस्थुर्नोअरातयः॥ योय
ज्ञस्यप्रसाधनस्तंतुर्देवेष्वाततः॥ तमाहुतंनशीमहि॥ मनोन्वाहुवामहेनाराशंसेन
सोमेन॥ पितॄणांचमन्मभिः॥ आतेएतुमनःपुनःक्रत्वेदक्षायजीवसे॥ ज्योक्चसूर्यं

दृशे॥ पुनर्नःपितरोमनोददातुदैव्योजनः॥ जीवंव्रातंसचेमहि॥ वयंसोमव्रतेतवम
नस्तनूषुबिभ्रतः॥ प्रजावंतःसचेमहि॥ अग्नेत्वंनोअंतमउतत्राताशिवोभवावरूथ्यः॥
वसुरग्निर्वसुश्रवाअच्छानक्षिद्युमत्तमंरयिंदाः॥ सनोबोधिश्रुधी हवमुरुष्याणोअघा
यतःसमस्मात्॥ तंत्वाशोचिष्ठदीदिवःसुम्नायनूनमीमहेसखिभ्यः॥ ततःस्वस्थानंगत्वा
ध्वर्युःपरिकर्मिणमाह॥ अनेनोदकुंभेनसंततयाधारयाऽग्निंत्रिःपर्येहि॥ परिक्रमंपूर्ववत्
करोति॥ यजमानःपूर्ववन्मार्जयति॥ मार्जयंतांपितरइत्यादि॥ कशिपुपबर्हणेपिंडसमी
पेनिदधाति॥ अंजनंददाति॥ अंजंतांपितरइत्यादि॥ अभ्यंजनंददाति॥ अभ्यंजंतांपि
तरइत्यादि॥ दर्भांविभज्यददाति॥ एतानिवःपितरोवासांस्येतानिवःपितामहावासां
स्येतानिवःप्रपितामहावासांसि॥ उपतिष्ठते॥ नमोवःपितरोरसायपितरोनमोवोयए

तस्मिन्लोके स्थ युष्माꣳ स्तेनु यैस्मिंल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्तु यैस्मिंल्लोके हं तेषां वसिष्ठो भूयासं॥ नमो वः पितरः शुष्मा यु नमो वः पितरो जीवा यु नमो वः पितरः स्वधा यु नमो वः पितरो मन्यवे नमो वः पितरो घोराय इति प्रतिमंत्र मनुषंगेण॥ अथ वीरं याचते॥ वीरं मे पितरो दत्त पितृमानहं युष्माभिर्भूयासं सुप्रजसो मया यूयं भूयास्त॥ वीरं मे पितामहा दत्त॰ वीरं मे प्रपितामहा॰॥ इत्यनुषंगेण॥ अथ पिंडस्थानि पितॄनुत्थापयति॥ उत्तिष्ठत पितरः प्रेत श्रीरायुमस्य पथा मनुयात पुराणं॥ धत्ता दुरमासु द्रविणं यच्चेमहे प्रणो ब्रूता द्वागुधां देवतासु॥ अथ पितॄन्मनसा स्वस्थाने निवेशयति॥ यंतु पितरो यथालोकं मनसा तत्वेन॥ परेत पितरः सोम्यागंभीरैः पथिभिः पूर्वैः॥ अथा पितॄन्सुविदत्राꣳ अपीतयु मेनयेसंधमादं मदंति॥ अथ पि

तॄन नुगतं स्वमन आह्वयते॥ मनो न्वाहुवामहे नाराशꣳसेन स्तोमेन पितॄणां च मन्मभिः॥ आनएतु मनः पुनः क्रत्वे दक्षाय जीवसे॥ ज्योक्च सूर्यं दृशे॥ पुनर्नः पितरो मनो ददातु दैव्यो जनः॥ जीवं व्रातꣳ सचेमहि॥ पिंडान्सहपरैरे आवनुप्रहरति॥ परिश्रयणमपनीयाध्वर्युराह॥ प्रस्तारयामः समिधमाधाय परिधीन्चाभिचस कृत्स कृत्संमृद्धि॥ अप बर्हिषोद्धावनूयाज्ञोयजति॥ देवो यजेति प्रथमं॥ यजेति द्वितीयं॥ स्रुग्व्यूहने॥ वाजस्य मेत्यादि॥ ब्रह्मदेवाः पितरो वीरधन्॥ इषितादेव्याः पित्र्याहोतारो भद्रवाच्या॰॥ यथा देवतमुज्जितीर्वोचयति॥ यज॰ रोहितेन त्वाग्निर्देवतां पितॄन्नामयतु हरिभ्यां त्वेंद्रो देवतां पितॄन्नामयतु त्वेन शेन त्वा सूर्यो देवतां पितॄन्नामयतु॥ अध्वर्युस्तृणमादाय ग्रीष्ममवेक्षते॥ स आह॥ संवदस्वा अ॰ अगन् ॥ आ॰॥ अगन्। अ॰ श्रावय। आ॰ श्रोषट्।

अ॰इदंब्रूहि॥आ॰अनुप्रहर॥स्वगादेव्याःपित्र्याःस्वस्तिःशंयोर्ब्रूहि॥मध्यमंप
रिधिंप्रहरति॥यंपरिधिं॰अग्नेदेवपित्रपुत्तिभिर्वृत्रयमाणाः॥तंत॰यीते॥द्वितीयं॥
यज्ञस्यपाथ्रउपसमिं हि॥यज्ञ॰वितेमुंचामि॰देवतासुपित्रेषु॥विष्णोःशंयोरहंदेव
पित्रयज्ञयोयज्ञेनप्र॰॥स्रुग्विमोकांतेनपत्नीसंयाजाः॥नाज्येला॥नयोक्रविमोकः॥न
दाक्षिणाग्निकोकुर्याद्वा॥होतुर्गार्हपत्यादातिप्रणीताद्वेदस्तरणांते॰अतिप्रणीतेप्राय
श्चित्तानि हुत्वासंस्थाजपोन॥ध्रुवाप्यायने॥आप्यायतां॰।प्रतिदेवपित्र्यज्ञैः॥सू
र्यायु॰अस्मिन्॥यजमा नःस्वभागंनिघ्रेणभक्षयति॥प्रजापतिर्विभां॰सह॥ततो
ध्वर्युरतिप्रणीते॰आश्रावितमित्यादिजुहुयात्॥ब्रह्मणायज्ञक्षेषप्रायश्चित्तेषु
गार्हपत्यदक्षिणा ग्न्याहवनीयेषुहुतेषुसमिष्टयजुर्जुहोति॥देवाःपितरोगातुवि॰

देवदेवेषुपित्रपुयज्ञ॰॥प्रणतानिनयनादि॥ब्रह्मासंस्थाजपवर्ज्यप्रायश्चित्तानिजु
हुयात्॥ततोयज्ञविमोकांतंप्रसूतिवत्॥नपयस्वतीरित्यादिन व्रतविसर्गः॥अग्नेगार्ह
पतइत्यादौ॰तामाशिषमाशासेतंतंवेदत्येवब्रूयात्॥ननामग्रहणं॥कशिघ्रादिदूर्वेनो
ह्यस्यसर्वेयज्ञोपवीतिनोगार्हपत्यमुपतिष्ठंते॥प्रजापते॰रयीणां॥यजमानोजपति॥य
दंतरिक्षं॰मनेहसं॥यज्ञोवैभूत्वेत्यादि ब्राह्मणतर्पणांतेष्टिः॥ ॥यद्वायज्ञोपवी तीयाः
पुरस्तादित्यादियस्यइत्यंतं॥प्राचीनावीतन्वादधाति॥प्राचीनावीतमिमादायेत्या
दिउत्तरेणगार्हपत्यंदारुपात्रीनिधायेत्यंतं॥अथयज्ञोपवीतमभिमृशति॥धूरसी
त्यादि॥यजमानस्ययज्ञोपवीतमग्निहोतारमिति॥ततोयजमानायप्रस्तरदानांते
प्राचीनावीतीबर्हिस्तृणाति॥अथयज्ञोपवीतीत्रिःप्रदक्षिणंपर्येति॥आज्यभागां
तेसर्वेप्राचीनावीतिनःसव्योत्तर्युपस्थाश्चप्रधानास्रुक्सादनांतं॥अथयज्ञोपवी

त्रिनोविपरिक्रामंत्यृत्विजोविपरिहरंतिहवीꣳषीत्यादि हविरुच्छिष्टोद्वासनांतं॥ अथप्रा
चीनावीतिनोयजमानस्यदारुपात्र्यांपुरोडाशमिश्रणादिगार्हपत्साहवनीययोरुदंचो
पनिष्क्रम्येत्यंतं॥ अथयज्ञोपवीतिनः सर्वे दक्षिणाग्निमुपतिष्ठंते॥ सर्वोपस्थानांतेप्रा
चीनावीतिनः॥ परिक्रमिणामाहुत्यादिपरिश्रयणामपनीययज्ञोपवीतिनोभवंति॥
ततःप्रस्थास्यामइत्यादियज्ञविमोकांते॥ अथप्राचीनावीतिनः कशिपादीन्युद्वा
सयंति॥ सर्वेयज्ञोपवीतिनोगार्हपत्यमुपतिष्ठंते॥ आदित एवप्राचीनावीतित्व
मा प्राजापत्यात्॥ यावदुक्तंप्राचीनावीतमन्यत्रयज्ञोपवीतं॥ यावदुक्तमेवयज्ञोप
वीतमन्यत्रप्राचीनावीतइति वेतियज्ञतंत्रोक्तेः॥ ॥इतिमहापिंडयज्ञप्रयोगः॥
॥ ॥अथत्र्यंबकेष्टिः॥ ॥अध्वर्युर्नीललोहितेसूत्रेपलाशांतिमपर्णे॥ अन्वा
हार्यपचनादेकोल्मुकमुदपात्रंदर्भानित्यादत्ते॥ ततःसर्वेगार्हपत्यमुपतिष्ठंते॥

यावंतोगृह्यास्मत्तेभ्यः कर्मकरंपशूनाꣳशर्मासिशर्मयजमानस्यशर्मासेयछ
मंत्रेणयजमानाध्वर्यूनूलीमितरे॥ सव्यादतुदद्भुरवाश्चतुष्पथंयति॥ तंप्राप्यो
पलिप्योल्मुकमाधायज्वालयित्वापरिस्तीर्यपरिषिच्यसमिधमाधायोपस्तरणाभि
घारणवर्जंसकृत्सकृदुत्तरार्धादवदायमध्यमपर्णेनतिष्ठन्नध्वर्युर्जुहोति॥ एकएव
रुद्रोनद्वितीयायतस्थेश्वाखुस्तेरुद्रपशुस्तंजुषस्वैषतेरुद्रभागः सहस्वस्त्रंबिक
यातंजुषस्वभेषजंगवेश्वायपुरुषायभेषजंमथोअस्मभ्यंभेषजꣳसुभेषजं
यथासतिसुगंमेषायमेष्यअवंबरुद्रमेदिमहत्यवंदेवंत्र्यंबकं॥ यथानःश्रेयसः
करद्यथानोवस्यसःकरद्यथानःपशुमतःकरद्यथानोव्यवसाययात्स्वाहा॥ य॰
रुद्रायंबिकायाइदं॰॥ पर्णमाखुबिलेनिधायप्रतिपुरुषमेकैकंयजमानायहोत्र्यं

बकानां प्रयच्छति॥ सर्वे दक्षिणानूरूनुपघ्नाना अग्निं प्रदक्षिणं यंति॥ त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ सकृत्परीत्योत्तरतः स्थित्वा पुरोडाशानूर्ध्वं क्षिपंति॥ हस्ताभ्यां गृह्णंति॥ भगायत्वा॥ एवं द्वितीयं तृतीयं परियंति॥ पतिकामाऽप्रत्ताकन्यात्रिरपसव्यं प्रसर्पति॥ सव्यमूरूमुपघ्नाना॥ त्र्यंबकं॰ गंधिं पतिवेदनं॥ उर्वा॰ बंधनाद्वितो मुक्षीय मापतेः॥ इति तस्या विशेषः॥ सकृत्परीत्योत्तरतः स्थित्वा भागमुत्क्षिप्य भगायत्वेति हस्ताभ्यां गृह्णाति॥ एवं द्वितीयं तृतीयं॥ ततः सर्वेऽत्तरतस्तिष्ठंति॥ अ॰ सर्वान्पुरोडाशान्गृहीत्वा यजमानांजलावावपते॥ प्रजयात्वा पशुभिः संसृजामि मासरेण सुरामिव॥ तान्यजमानः पत्न्यंजलावावपति॥ प्रजयात्वा पशुभिः संसृजामि॰॥ तान्पत्नी दुहि

त्रंजलावावपति॥ भगेनत्वा॰॥ अथाध्वर्युस्तान्पुरोडाशानादायत्रणकृतेमूते प्रक्षिप्य नीललोहिताभ्यां सूत्राभ्यां विविधं बध्नाति तत्प्रदेश एव शुष्के स्थाणावर्धछिन्न शुष्कशाखायां वा तूष्णीं बध्नाति॥ सर्वे दिवं प्रेक्षमाणाया वदुच्छ्वासं मूतमुपतिष्ठेत॥ एषते रुद्रभागस्तं जुषस्व स्वाहा तेनावसेन परोमूजवतो तीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ आत्मनो मूतस्य च मध्ये दीर्घधारा रूपेणोदकं निनीय पूर्वगृहीतमुदपात्रं परास्य पृष्ठतो न वेक्षमाणाय थ्याग तमायंति॥ हस्तपादान्प्रक्षाल्याचम्य ते चेवाग्निषु आदित्येष्टिं कुर्यात्॥ ॥ याः पुरस्तादित्यादि आदित्येन हविषा यक्ष्ये आदित्यं हविः॥ व्रीहिमयश्चरुः॥ पंच प्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ अदितिः प्रधानदेवता॥ अग्निः स्विष्टकृदित्यादि यक्ष्यस्यंते॥ अन्वाधानादि नव्रतं॥ सप्तदशसामिधेन्यः॥ सांतपनवत्यात्रासादनादि॥ देवीर्प्रतियो॰ आर्यंतु देव्यः देव्यो॰॥

इदं देवानामिति॥ प्रधानमुच्चैः॥ अदित्या अहं॰ वाऽहं सोमुच्येयं॥ अ
न्वाहार्यमासाद्यति स्रोगादद्दाति॥ व्रतविसर्गो दिसर्वपूर्णमासवत्॥ मंत्रे॰ यद्मा
पृथिवीमुंही॥ ऋतुभिः पर्यवर्तयत्॥ यौस्याः पृथिव्यास्त्वचि॥ निवर्तयत्योषधीः॥ अ
ग्निरीशानु ओजसा। वरुणोधीतिभिः सह॥ इंद्रो मरुद्भिः सरिवभिः सह॥ अग्निस्तिग्मेन
सादि॥ इदावत्सरीणां खुत्तमाशास्ते इति विशेषः॥ ॥ संतिष्ठते साकमेधपर्व॥ ॥ अ
थ शुनासीरीयप्रयोगः॥ ॥ अपरेद्युः प्रातर्हुतेग्निहोत्रे याः पुरस्तादि॥ शुनासीरीयहवि
र्भिर्यक्ष्ये॥ ओंतथेत्यंते॥ शुनासीरीयं हविः॥ व्रीहिमयः पुरोडाशो द्रव्यं॥ व्रीहिमयश्चरुः॥
पयश्च॥ नवप्रयाजाः॥ अग्नीषोमावाज्यभागौ॥ अग्न्यादिपूषांते वायुः ६ इंद्रः शुनासीरः ७
इंद्राग्नी ८ विश्वेदेवाः ९ सूर्यः १० इति प्रधानदेवताः॥ अग्निः स्विष्टकृन्नवानुयाजाः॥ सूक्त राम
वाकशंयुयाकौ॥ चत्वारः पत्नीसंयाजाः॥ एवमात्मकेनसांगेन कर्मणाश्वः सद्यो वायक्ष्ये॥ ५०

चिहरणादि व्रतांते ध्वर्युः॥ इडादेवहूर्वागातुविदइतिजपित्वा इषेत्वेति शारवांछित्वाय
जमानस्य पुच्छं न्यीहीत्यंते॥ अग्निदारानादि॥ वैश्वदेववदिध्मसंभरणांते द्व्यहः पक्षे॰ ग्निहोत्रहो
मांते तूष्णीं दर्भैर्वत्सापाकरणं॥ नसायंदोहः॥ पाणिसंमर्शनादि। स्फ्यंचकपालानिचऽप्य। चरु
स्थाली श्चमेक्षणानिच पृषदाज्यग्रहणी आशयपात्रंचेति सविशेषाण्यासादयेत्॥ निर्वपा
अग्न्यादिपूषांते इंद्रायशुनासीरायेंद्राग्निभ्यां॰ विश्वेभ्यो देवेभ्यः। सूर्यायेति निरूप्य अव
घातांते प्रातर्दोहः॥ इह वै वायुरमयतु गावः॥ प्रणो ब्रूहि वायवे हविर्॰ बहुदुग्धि वायवे॰।
द्व्यहः कालस्ते प्रातर्होमात्पूर्वे प्रातर्दोह इति केशवतंत्रस्तो॥ अग्नये सवित्रे पूष्णे इंद्रायशुना
सीरायेंद्राग्निभ्यां सूर्यायजुष्टमधिवपामीति॥ कपालोपधाने॥ वैश्वदेववत्पूषोपधानांते
वायव्यं पयो मेक्षणेनालोड्य श्रपयति॥ तदुत्तरतः॥ इंद्रायशुनासीरायेंद्राग्निभ्यां च द्वाद

शद्वादशकपालान्युपधायविश्वेभ्योदेवेभ्यश्चरुस्थाली॰अधिश्रित्यसूर्यायैकंकपाल
मुपदध्यात्॥ब्रह्मन्नुत्तरंपरिग्राहमित्यंतंवैश्वदेववत्॥कालेऽषदात्यग्रहणंमंथनंच॥
सवितासूर्यश्चोपांशु॥पौर्णमासागांतेजुह्वामुपस्तीर्यस्रुवेणपयोऽवघन्नाह॥वायवेनुब्रूही
ति॥वायोरहं॰रत्नभाकू॰॥इंद्रस्यश्रुनासीरस्याहं॰वैंद्रियावीर्यायासं॥इंद्राग्न्योःपूर्वय
त्॥विश्वेषांदेवानांच॥सूर्यस्याहं॰शत्रुहा॰सुदृशीकोवा॥उपहोमपक्षे॰मधुश्चेतिच
तत्रत्येके॥सकृद्गृहीतेनाउपयामगृहीतोसिसंसर्पोस्यंहस्पत्यायत्वास्वाहा॥य॰सं
सर्पायांहस्पत्यायेदंनममेतिकेचित्॥अधिमासायेदमित्यन्ये॥अधिमाससत्वएवैषा
आहुतिरितिनुयुक्तं॥अन्वाहार्यमासाद्यद्वादशगवंसीरंप्रथमजंवत्संचददाति॥ब्र
ह्मणेद्वादशगवंसीरंरुद्रायगामितिप्रतिग्रहः॥यथादेवतमुज्जितिवाचनं॥वैश्वदे ५९

वत्समिष्टयजूंषिकालेउपवेषोपगृहनंच॥ब्राह्मणतर्पणांतेनिवर्तनादिपूर्ववत्॥॥
मंत्रेविशेषः॥एकंमासमुदेरजत्॥पुरमेष्ठीप्रजापत्यः॥तेनाभ्योमहआवहत्॥अमृतंम
र्त्यीभ्यः॥प्रजामनुप्रजायसे॥तदुतेमर्त्यामृतं॥येनमासाअर्धमासाः॥ऋतवःपरिव
त्सराः॥येनतेनैप्रजापते॥ईजानस्यन्यवर्तयन्॥तेनाहमस्यब्रह्मणा॥निवर्तयामि
जीवसे॥अग्निस्तिग्मेनशोचिषा॥तपआक्रांतमुष्णिहा॥शिरस्तपस्याहितं॥वैश्वान
रस्यतेजसा॥ऋतेनास्यनिवर्तये॥सत्येनपरिवर्तये॥तपसास्यानुवर्तये॥शिवेनास्योपव
र्तये॥शग्मेनास्याभिवर्तये॥श्रीश्चस्तदृतंतत्सत्यं॥तद्धृतंतल्लोकेयं॥तेनेशकेयंतेनेरा
ध्यासं॥इतिप्रतिविभागंमंत्रावृत्तिः॥वैश्वदेववद्रूपनांतेस्नातःस्वस्थानस्थो
यजमानः॥अनुवत्सरीणांस्व त्तिमाशास्तेदनिवदेत्॥ततोऽग्नीनूप्रदक्षि

णीकृत्यनमस्कृत्यविष्णुंस्मृत्वाभगवदर्पणंकुर्यादिति॥ ॥छ॥ ॥इतिश्रुना
सी रीयपर्व॥ ॥छ॥ ॥संतिष्ठंतेचातुर्मास्यानि॥ ॥छ॥ ॥बोधायनी
यकल्पोक्तचातुर्मास्यनिरूपणं॥अकार्यंनंतदेवेनतेनतुष्यतुयज्ञभुक्॥ ॥
॥इतियथाप्रयोगपक्षमवलंब्यबोधायनीयआश्वलायनोपयोगीचातुर्मास्य
प्रयोगोरघुनाथनवहस्तकृतःसंपूर्णः॥ ॥छ॥ ॥छ॥ ॥श्रीलक्ष्मीनारायणा
र्पणमस्तु॥ ॥छ॥नेवतावदृषिछंदःश्रोतेस्मार्तेचकर्मणि॥मंत्रादौप्रणवंचे

समाप्तः॥

तिदेवस्वामीयभाष्यके॥१॥ शौनकः॥अविज्ञातस्वरामंत्राःप्रयोक्तव्याः
प्रयोक्तृभिः॥एकश्रुत्यैवहोमेषुविज्ञातश्चविकल्पितः॥२॥ ॥रामचंद्र॥ ॥
॥शके१६८८व्ययनामसंवत्सरेपौषशुक्लद्वितीयायांलिखितानिचातुर्मा
स्यानिश्रीलक्ष्मीनारायणप्रीतये॥ ॥इतिचातुर्मास्यानिसमाप्तानि॥ ॥
॥ ॥थालोपनामकनागेशभट्टात्मजशेषभट्टेनलिखितमिदंपुस्तकंयजन
विद्रुपकारार्थं॥ ॥श्री गुरुचरणयोरर्पितं॥ ॥श्रीः॥ ॥रामः॥ ॥श्रीः॥ ॥
न्यमानस्यास्रमेध्यमपुपाप्मानंयजमानस्यहंतु॥शिवानःसंतुप्रदिशःश्रितस्त्रः
शंनोमातापृथिवी तोकसाइतिउ इत्याशंनोदेवीरस्वोदय ॥१॥

॥याः पुरस्तादिस्यादिनिविष्टमियं ते अत्विग्वरणं कुर्यात्॥ ब्रह्मा णमेव प्रथमं वृ
णीतेऽथ होतारमथाध्वर्युमथाग्नीध्रं चाचं द्रमो मे ब्रह्मा समे ब्रह्मा ब्रह्माणं त्वा देव
दत्त शर्माणं वरुण इति ब्रह्माणं॥ सहनोऽजपति॥ महन्मे वोचो भगो मे वोचो भगो
मे वोचो यज्ञो मे वोचस्तोमो मे वोचः पृष्ठं मे वोचो भुक्तिं मे वोच स्वष्टिं मे वोचः सर्वं
मे वोचः॥ चंद्रमा स्त ब्रह्मा स ते ब्रह्मा ब्रह्माऽहं ते मानुष इति प्रतिजानीते॥ अ
ग्निर्मे होता स मे होता होतारं त्वा देव दत्त शर्माणं वरुण इति होतारं॥ सहनोऽजपती॥
महन्मे वोचो॥ अग्निष्टे होता स ते होता होताहं ते मानुषः॥ आदित्यो मेऽध्वर्युः
स मेऽध्वर्युरध्वर्युं त्वा देव दत्त शर्माणं वरुण इत्यध्वर्युं॥ अ॥ अस्मिन्कर्मणि आ
ग्नीध्रं त्वामहं वृणे॥ सहनो। स्मीनि चदेत्॥ ॥अथ मधुपर्कः॥ विष्टरः पाद्य

राम
५३

स हनोऽजपति॥ महन्मे वोचो॥ आदित्यस्ते ध्वर्युः स ते ध्वर्युरध्वर्युरहं ते मानुष इति

५४

॥इति बोधायनसूत्रानुसारी चातुर्मास्य॥
॥प्रयोगः समाप्तिमगमत्॥ श्रीरस्तु॥

राम
५४

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मर्घ्यमाचमनीयंमधुपर्कोगौःषट् संपाद्यानि स्त्रिरेकैकं निवेद्य॥

निष्ठोत्वंनोअंतमःशर्मयच्छसहंत्य॥प्रतेधारामधुश्चुतउत्संदुह्रतेअक्षि

तं॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY